# MudgalapurAna Khanda 7 Vighnarajacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૭ વિઘ્નરાજચરિતમ્

## Document Information

Text title : Mudgala Purana Khanda 7 Vighnarajacharitam

File name : mudgalapurANam7.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2023

*sanskritdocuments.org*

MudgalapurAna Khanda 7 Vighnarajacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૭ વિઘ્નરાજચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૭ ॥

॥ અથ શ્રીમુદ્ગલપુરાણે સપ્તમઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૭ અ. ૧ પાન ૧)

## ૭.૧ દિતિશોકવર્ણનં નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
વિકટસ્ય ચરિત્રં વૈ શ્રુત્વા સૂત મહામતે ।
હર્ષિતોઽહં વિશેષેણ બ્રહ્મભૂયપ્રકાશકમ્ ॥ ૧॥

યત્કિઞ્ચિદ્ગણરાજસ્ય ચેષ્ટિતં વ્યાસશિષ્યક ।
તદેવ બ્રહ્મસાયુજ્યદાયકં નાઽત્ર સંશયઃ ॥ ૨॥

ધન્યં ભાગ્યં મુનીન્દ્રાણાં મદીયં યેન તે દ્વિજ ।
દર્શનં સાધુરૂપસ્ય જાતં યોગપ્રદસ્ય ચ ॥ ૩॥

યોગવૃષ્ટિમયીં ગાથાં ચ્યુતાં ત્વન્મુખમેઘતઃ ।
પીત્વા ન યામિ તૃપ્તિં ચ સુધાં પીત્વા યથા નરઃ ॥ ૪॥

અધુના કૃપયા બ્રૂહિ વિઘ્નરાજસ્ય ચેષ્ટિતમ્ ।
મમાસુરવિનાશાખ્યં બ્રહ્મપ્રાપ્તિકરં પરમ્ ॥ ૫॥

સૂત ઉવાચ ।
મુદ્ગલસ્ય મુખાત્ પુણ્યાં કથાં શ્રુત્વા પ્રજાપતિઃ ।
વિકટસ્ય પુનસ્તં ચ જગાદૈવ સ હર્ષિતઃ ॥ ૬॥

દક્ષ ઉવાચ ।
ધન્યં મે જન્મ કર્માદિ યેન તેઽભૂત્સમાગમઃ ।

વદસે યોગદાં પૂર્ણાં કથાં યોગીન્દ્રવન્દિત ॥ ૭॥

આઙ્ગિરસકુલે સાક્ષાદ્યોગરૂપધરઃ પ્રભો ।
ત્વં જાતોઽસિ ન સન્દેહઃ કુલતારક એવ ચ ॥ ૮॥

અધુના વદ માહાત્મ્યં વિઘ્નરાજસ્ય સર્વદમ્ ।
શ્રુતં વિકટમાહાત્મ્યં ન તૃપ્તોઽહં તુ મુદ્ગલ ॥ ૯॥

કીદૃશં બ્રહ્મ તસ્યાઽપિ કિમર્થં દેહધારકઃ ।
કિં કર્મા કુત્ર વાસઃ સન્તિષ્ઠતે વિઘ્નનાયકઃ ॥ ૧૦॥

કસ્ય દૈત્યસ્ય હન્તાઽસૌ ચરિત્રં વદ સર્વપમ્ ।
વિઘ્નરાજસ્ય સર્વં તુ વિચારેણ મહાત્મનઃ ॥ ૧૧॥

મુદ્ગલ ઉવાચ ।
દક્ષ ત્વં યોગિવન્દ્યશ્ચ ભવિષ્યસિ ન સંશયઃ ।
કથાં શ્રુત્વા ગણેશસ્ય પ્રીતિઃ સંવર્ધતે યતઃ ॥ ૧૨॥

સમાસેન પ્રવક્ષ્યામિ વિઘ્નરાજસ્ય સૌખ્યદમ્ ।
ચરિત્રં શ‍ૃણુ ભાવેન સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૩॥

અત્ર તે કથયિષ્યામિ પુરાતનભવં પરમ્ ।
ઇતિહાસં કશ્યપસ્ય દિત્યાઃ સંવાદસંયુતમ્ ॥ ૧૪॥

મહાસુરૌઽદિતેઃ પુત્રૌ હિરણ્યકશિપુર્મહાન્ ।
હિરણ્યાક્ષો હતો પૂર્વં વિષ્ણુના માયયા પરૌ ॥ ૧૫॥

તતોઽતિશોકસંયુક્તા દિતિઃ કશ્યપમાયયૌ ।
સેવાયાં નિરતા તસ્ય નિત્યં ભક્તિપરાયણા ॥ ૧૬॥

એવં બહૌ ગતે કાલે કાશ્યપસ્તોષમાયયૌ ।
તામુવાચ વરં બ્રૂહિ તતસ્તં સા જગાદ હ ॥ ૧૭॥

દિતિરુવાચ ।
મમ પુત્રૌ હતૌ તેન વિષ્ણુના મઘવાર્થતઃ ।
અત ઇન્દ્રઘ્નપુત્રં મે દેહિ તુષ્ટોઽસિ કશ્યપ ॥ ૧૮॥

તસ્યાસ્તદ્વચનં શ્રુત્વા શોકયુક્તો બભૂવ હ ।
અહો સાધુચરિત્રાઽપિ સ્ત્રી વિશ્વાસ્યા ન કેનચિત્ ॥ ૧૯॥

અધુના કિં કરિષ્યામિ ધર્મપાલકમુત્તમમ્ ।

સાધું ગુણયુતં પુત્રમિન્દ્રં રક્ષામિ વૈ કથમ્ ॥ ૨૦॥

અતો વિઘ્નેશ્વરં સ્મૃત્વા તાં જગાદ પ્રજાપતિઃ ।
વ્રતં કુરુ પ્રયત્નેન વર્ષમાત્રં મહાખલે ॥ ૨૧॥

તદા તે ભવિતા પુત્રો હન્તેન્દ્રસ્ય ન સંશયઃ ।
છિદ્રં મા કુરુ ભાવેન વ્રતે વિઘ્નયુતાઽપિ ચેત્ ॥ ૨૨॥

એવમુક્ત્વા ગણેશં સ ધ્યાત્વા રેમે તયા સહ ।
તસ્યાં વીર્યં સમાધાય વ્રતં દદૌ સુપુત્રદમ્ ॥ ૨૩॥

પ્રણમ્ય સ્વગૃહં સા તમાયયૌ હર્ષસંયુતા ।
વ્રતં ચકાર યત્નેન નિયમસ્થા પ્રજાપતે ॥ ૨૪॥

તત ઇન્દ્રેણ વૃત્તાન્તો જ્ઞાતો નારદવાક્યતઃ ।
ગણેશં મનસિ ધ્યાત્વા નિઃશ્વાસં સ મુમોચ હ ॥ ૨૫॥

(Page ખં. ૭ અ. ૧ પાન ૨)
તતસ્તસ્ય હૃદિસ્થો વૈ વિઘ્નરાજો મતિં દદૌ ।
ઇન્દ્રસ્તામાયયૌ દેવીં માતરં સેવનોત્સુકઃ ॥ ૨૬॥

દિતિં સિષેવે નિત્યં સ વ્રતયુક્તાં પ્રણમ્ય હ ।
છિદ્રદર્શી પ્રજાનાથ ભક્તિયુક્તઃ પ્રતાપવાન્ ॥ ૨૭॥

નવમાસા ગતાસ્તત્ર તથાપિ છિદ્રકં પરમ્ ।
કિઞ્ચિન્ન દદૃશે સોઽપિ વિહ્વલોઽભૂત્ સુરેશ્વરઃ ॥ ૨૮॥

વિઘ્નરાજં હૃદિ ધ્યાત્વા ચિન્તાયુક્તઃ સુરાધિપઃ ।
તાં સિષેવે યુતો ભક્ત્યા સદા તન્મયચેતસા ॥ ૨૯॥

દશભિર્દિવસૈર્ન્યૂનં વર્ષં તત્ર ગતં કિલ ।
તતોઽતિતાપસંયુક્તઃ કિં ભવિષ્યતિ વિહ્વલઃ ॥ ૩૦॥

તતો વિઘ્નકરો વિઘ્નં ચકાર પરમાદ્ભુતમ્ ।
સ્વયં સા મોહિતા દેવી ભ્રાન્તા જાતા સહર્ષતઃ ॥ ૩૧॥

વિચારમકરોચ્ચિત્તે વ્રતે સંવત્સરો ગતઃ ।
કિઞ્ચિન્ન્યૂના ચ મે વાઞ્છા સિદ્ધા જાતા ન સંશયઃ ॥ ૩૨॥

હિત્વા ત્રિલોકગં રાજ્યં સુત ઐન્દ્રં કરિષ્યતિ ।
મમોદરાત્ સમુત્પન્નઃ કૃતકૃત્યાઽસ્મિ સામ્પ્રતમ્ ॥ ૩૩॥

તતોઽતિનિદ્રયા દેવી પીડિતા મસ્તકં મુદા ।
જાનુમધ્યે સમાકૃત્ય સુષ્વાપ મોહસંયુતા ॥ ૩૪॥

દિવસે નિદ્રયા તસ્યા વ્રતં ભગ્નં બભૂવ હ ।
જાનુમધ્યે શિરસ્તેન દ્વે છિદ્રે સમ્બભૂવતુઃ ॥ ૩૫॥

ઇન્દ્રસ્તાં તાદૃશીં દૃષ્ટ્વા હર્ષિતોઽભૂદ્ગજાનનમ્ ।
સ્મૃત્વા વજ્રં સમાગૃહ્યોદરં વિવેશ માયયા ॥ ૩૬॥

તત્ર તેજોયુતં ગર્ભં દદર્શ દેવનાયકઃ ।
ચકાર તસ્ય વજ્રેણ સપ્ત ખણ્ડાનિ વૈરતઃ ॥ ૩૭॥

તપસોગ્રેણ દિત્યાઃ સ ન મમાર તથાપ્યહો ।
રુરોદ સપ્તદેહસ્થો ગર્ભસ્તેજસ્વિનાં વરઃ ॥ ૩૮॥

દૃષ્ટ્વા વિસ્મિતચિત્તઃ સ સ્મૃત્વા વિઘ્નેશ્વરં પુનઃ ।
એકૈકં સપ્તધા કૃત્વા સંસ્થિતો વજ્રધારયા ॥ ૩૯॥

તથાપિ ન મમારાઽસૌ ગર્ભઃ પરમપાવનઃ ।
તાવદ્દેહધરો ભૂત્વા રુરોદ ભયવિહ્વલઃ ॥ ૪૦॥

જગાદ મઘવન્તં સ ગર્ભો હંસિ સુરેશ્વર ।
કિમર્થં ભ્રાતરસ્તે વૈ વયં સર્વે ન સંશયઃ ॥ ૪૧॥

તેષાં તદ્વચનં શ્રુત્વા પુનરિન્દ્ર ઉવાચ તાન્ ।
વૈરભાવં પરિત્યજ્ય ભવિષ્યથ દિવૌકસઃ ॥ ૪૨॥

તથેતિ તૈઃ કૃતં તત્ર બહિરિન્દ્રઃ સમાયયૌ ।
તતો દિતિઃ પ્રજાનાથ જજાગાર શુશોચ હ ॥ ૪૩॥

એતસ્મિન્નન્તરે તત્ર પુત્રાન્ સા સુષુવે પરાન્ ।
એકોનપઞ્ચાશત્કાંસ્તુ વીક્ષ્ય ચેન્દ્રમુવાચ સા ॥ ૪૪॥

દિતિરુવાચ ।
ઇન્દ્ર કિં બહવઃ પુત્રા એકઃ સઙ્કલ્પિતોઽભવત્ ।
વદ સત્યં મહાભાગ ચેજ્જાનાસિ સુરેશ્વર ॥ ૪૫॥

ઇન્દ્ર ઉવાચ ।
મયા જ્ઞાતં ત્વદીયં યચ્ચેષ્ટિતં મેઽત્ર નાશકમ્ ।

માતસ્તદર્થમાયાતઃ સેવાર્થં તે ન સંશયઃ ॥ ૪૬॥

છિદ્રં દૃષ્ટં વ્રતે માતસ્તત એતત્ કૃતં મયા ।
વજ્રેણ જઠરે ગત્વા ગર્ભં છિત્વા બહિર્ગતઃ ॥ ૪૭॥

તપોબલેનૈવ નવ ન મૃતાસ્તે સુતા ઇમે ।
સ્વયં પ્રાણધરા જાતા વાયવશ્ચ ભવન્તુ હિ ॥ ૪૮॥

તાન્ ગૃહ્ય મઘવા સ્વર્ગં જગામ ન શશાપ સા ।
સત્યભાષણસંયુક્તમિન્દ્રં તુષ્ટા બભૂવ હ ॥ ૪૯॥

કદા દૈત્યાન્ સમાલોક્ય દીનાન્ શોકપરાયણા ।
(Page ખં. ૭ અ. ૨ પાન ૩)
પુનઃ કશ્યપમાગત્ય પ્રણનામ પતિવ્રતા ॥ ૫૦॥

જગાદ તં સુદુઃખેન યુક્તા પ્રજાપતિં વચઃ ।
વિનયેન સમાયુક્તા સ્વાર્થમોહયુતા પરા ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે દિતિશોકવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૭.૧

## ૭.૨ શિવપાર્વતીસમાગમો નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દિતિરુવાચ ।
સ્વામિન્ પુત્રૌ મૃતાવાદૌ પુનસ્ત્વદ્વરદાનતઃ ।
પુત્રો જાતો મહેન્દ્રસ્ય મિત્રં નાનાસ્વરૂપધૃક્ ॥ ૧॥

દૈત્યા દુઃખયુતા નાથ તદર્થં કિં કરોમ્યહમ્ ।
નિષ્ફલો મે સમારમ્ભો ભવતિ સ્મ નિરન્તરમ્ ॥ ૨॥

મૂર્ધનિ ત્વયિ મે નાથ સમર્થે દુઃખમીદૃશમ્ ।
મયા પ્રાપ્તં વિશેષેણ કિં કરોમિ વદસ્વ મામ્ ॥ ૩॥

પુત્રપૌત્રાદિસંયુક્તઃ સંસારઃ પરિકીર્તિતઃ ।
સ એવ ત્વયિ સંસ્થે મે નિષ્ફલઃ પ્રબભૂવ હ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
તસ્યાસ્તદ્વચનં શ્રુત્વા ખિન્નાયાસ્તાં પ્રજાપતિઃ ।

જગાદ સ્મયમાનઃ સ યોગીન્દ્રઃ પરમાર્થવિત્ ॥ ૫॥

કશ્યપ ઉવાચ ।
મા ખેદં કુરુ કલ્યાણિ કર્મણાં ગતિરીદૃશી ।
સંસારો દુઃખમોહાદિયુક્તઃ શાસ્ત્રે નિગદ્યતે ॥ ૬॥

દૈત્યાઃ પાપસમાચારા દેવાઃ પુણ્યતમા મતાઃ ।
પાપિનાં ન સુખં દેવિ શાશ્વતં વેદવાદતઃ ॥ ૭॥

કથિતં વેદવાદેષુ વચનં સત્યમેવ તત્ ।
ભવિષ્યતિ ન સન્દેહો મમતાં તત્ર મા કુરુ ॥ ૮॥

પુત્રા જાતાઃ પ્રિયે તે યે તેષાં પુત્રાદયઃ સ્મૃતાઃ ।
એવં પરમ્પરા જાતા ભવિષ્યતિ નિરન્તરમ્ ॥ ૯॥

ન વંશચ્છેદિતા તે તુ ભવિષ્યતિ કદાચન ।
દૈત્યા મૃત્યુયુતાઃ પ્રોક્તાઃ કિમર્થં શ્રામ્યસે વૃથા ॥ ૧૦॥

કશ્યપસ્ય વચઃ શ્રુત્વા દિતિસ્તં પુનરબ્રવીત્ ।
શોકસન્તપ્તગાત્રા સા પતિં તેજસ્વિનાં વરમ્ ॥ ૧૧॥

દિતિરુવાચ ।
સૃષ્ટિકર્તા સ્વયં સાક્ષાત્ત્વં સમર્થો ન સંશયઃ ।
અકર્તે કર્તુમીશશ્ચાન્યથા કર્તુમપિ પ્રભો ॥ ૧૨॥

મમતાં સર્વભાવેષુ ત્યક્ત્વા ત્વં યોગિસત્તમ ।
સંસ્થિતોઽસિ યથા વેદવાદં જ્ઞાત્વા મહામતે ॥ ૧૩॥

અહં મોહસમાયુક્તા સદા તાપત્રયાન્વિતા ।
દહામિ મમતાત્યાગમાર્ગં મે બ્રૂહિ માનદ ॥ ૧૪॥

યેન શાન્તિં સમાલભ્ય સ્થાસ્યામિ દાહવર્જિતા ।
તત્સુખેનૈવ ભવતુ ભાવિ યત્તાદૃશીં કુરુ ॥ ૧૫॥

તસ્યાસ્તદ્વચનં શ્રુત્વા કશ્યપો દયયા યુતઃ ।
શાન્તિમાર્ગાર્થમેવં તાં જગાદ હર્ષસંયુતઃ ॥ ૧૬॥

કશ્યપ ઉવાચ ।
અત્ર તેઽહં વદિષ્યામીતિહાસં ચ પુરાતનમ્ ।
તં જ્ઞાત્વા શાન્તિયુક્તા ત્વં ભજિષ્યસિ ગજાનનમ્ ॥ ૧૭॥

(Page ખં. ૭ અ. ૨ પાન ૪)
હિમાચલસુતા જાતા પાર્વતી ભગિની ચ તે ।
તપસાઽઽરાધિતા તેન મહામાયા પરાત્પરા ॥ ૧૮॥

હિમાચલં સમાશ્રિત્ય શિવો ધ્યાનપરાયણઃ ।
તતાપ તપ ઉગ્રં સ ગણેશં ચિન્ત્ય સર્વદા ॥ ૧૯॥

અત્રાગત્ય મહેશાનં પાર્વતી સેવનોત્સુકા ।
પતિં જ્ઞાત્વા વિશેષેણ સિષેવે યત્નસંયુતા ॥ ૨૦॥

મહાદેવો વિદિત્વા તાં મનસિ ક્રોધમાદધે ।
મામુલ્લઙ્ઘ્ય ગતા દક્ષાધ્વરે ચેયં વિશેષતઃ ॥ ૨૧॥

સ્વાજ્ઞાહીના ન યોગ્યા વૈ પત્ની વેદે પ્રકીર્તિતમ્ ।
અતઃ પત્નીવિહીનઃ સન્ ભજેઽહં વિઘ્નપં સદા ॥ ૨૨॥

એવં મનસિ સન્ધાર્ય ન તાં મેને મહેશ્વરઃ ।
સમાગતાં તયા સોઽપિ ભાષણં ન ચકાર હ ॥ ૨૩॥

તતોઽતિખેદસંયુક્તા પાર્વતી તં મહેશ્વરમ્ ।
સિષેવે ભક્તિસંયુક્તા નિયમસ્થા સુરૂપિણી ॥ ૨૪॥

હાવભાવસમાયુક્તાં નિત્યં સેવાપરાયણામ્ ।
જગામ પર્વતાદ્વીક્ષ્ય પતિભાવકરીં શિવઃ ॥ ૨૫॥

ગતં સદાશિવં વીક્ષ્ય પાર્વતી શોકસંયુતા ।
દેહત્યાગે સમારબ્ધા સસ્માર દ્વિરદાનનમ્ ॥ ૨૬॥

તસ્ય સ્મરણમાત્રેણ સ્ફૂર્તિર્જાતા પરા હૃદિ ।
વિચારમકરોચ્ચિત્તે શિવા દુઃખસમન્વિતા ॥ ૨૭॥

માં ત્યક્ત્વા શઙ્કરો દેવો ગતો માનસમન્વિતઃ ।
ન વૃણોતિ કદાચિત્ સ નિશ્ચિતં શઙ્કરેણ તત્ ॥ ૨૮॥

વેદે સઙ્કથિતં વાક્યં તપસા દુર્લભં કદા ।
કિઞ્ચિદ્ભવેન્ન તં દેવં તપસાઽઽરાધયામ્યહમ્ ॥ ૨૯॥

એવં નિશ્ચિત્ય સા દેવી તતાપ તપ ઉત્તમમ્ ।
ધ્યાત્વા સદાશિવં નિત્યં વનસ્થા સખિસંયુતા ॥ ૩૦॥

પઞ્ચાક્ષરવિધાનેન તોષયામાસ શઙ્કરમ્ ।

લિઙ્ગપૂજાપરા દેવી નાનાતપઃપરાયણા ॥ ૩૧॥

એવં બહૌ ગતે કાલે ન તુતોષ સદાશિવઃ ।
ક્રોધયુક્તઃ સ્વભાવેન ન તાં મેને કદાચન ॥ ૩૨॥

તતો વિઘ્નેશ્વરં દેવી મન્ત્રેણૈકાક્ષરેણ ચ ।
તોષયામાસ તં ધ્યાત્વા નિત્યં પૂજાપરાયણા ॥ ૩૩॥

ત્યક્ત્વા સદાશિવં દેવી ગણેશભજને રતા ।
તતઃ સ્વલ્પેન કાલેન શિવબુદ્ધિશ્ચચાલ હ ॥ ૩૪॥

શ્રાવણે શુક્લપક્ષે સા ચતુર્થ્યાં મૃન્મયં પરમ્ ।
કૃત્વા ગણેશ્વરં નિત્યં પૂજયામાસ ભક્તિતઃ ॥ ૩૫॥

વાયુમાત્રાશના દેવી તાં મૂર્તિં ભાવસંયુતા ।
પૂજ્ય ધ્યાનપરા ભૂત્વા જજાપ મન્ત્રમુત્તમમ્ ॥ ૩૬॥

પુરશ્ચરણમાર્ગેણ મન્ત્રં જજાપ નિત્યદા ।
તતસ્તાં શઙ્કરો દેવો મનસા સઙ્ગતોઽભવત્ ॥ ૩૭॥

શિવશ્ચિન્તાં ચકારૈવં દેવી તપસિ સંસ્થિતા ।
અધુના તાં ગમિષ્યામિ મદર્થં નિયમાન્વિતામ્ ॥ ૩૮॥

દેહભૃદપરાધૈશ્ચ સંયુક્તો જાયતે કદા ।
અતઃ ક્ષમાપનં કૃત્વા વરિષ્યામિ ન સંશયઃ ॥ ૩૯॥

એવં વિચાર્ય દેવેશસ્તાં યયૌ પાર્વતીપતિઃ ।
દૃષ્ટ્વા શ્રમયુતાં દેવીં વિસ્મિતો મોહિતોઽભવત્ ॥ ૪૦॥

બ્રહ્મચારિસ્વરૂપેણ નિન્દયામાસ શઙ્કરમ્ ।
સા તં ક્રોધયુતા ભર્ત્સ્ય નિર્યયૌ વનગાચરત્ ॥ ૪૧॥

તતોઽતિતોષસંયુક્તઃ શઙ્કરો રૂપમાદધે ।
સ્વકીયં તદ્વિલોક્યૈવ નનામ જગદમ્બિકા ॥ ૪૨॥

તુષ્ટાવ તં મહાદેવં તતઃ સ વરદોઽભવત્ ।
(Page ખં. ૭ અ. ૩ પાન ૫)
જગાદ મોહસંયુક્તઃ પાર્વતીમીશ્વરેશ્વરઃ ॥ ૪૩॥

શિવ ઉવાચ ।
વરં વૃણુ મહાભાગે તપસા વિજિતસ્ત્વયા ।

દાસ્યામિ નાત્ર સન્દેહસ્ત્વદધીનોઽહમાદરાત્ ॥ ૪૪॥

ત્વદાજ્ઞાવશગો ભૂત્વા સ્થાસ્યામિ નિત્યમઞ્જસા ।
ભાર્યા મે ભવ કલ્યાણિ પતિસ્તેઽહં પુરાતનઃ ॥ ૪૫॥

પાર્વત્યુવાચ ।
યદિ પ્રસન્નભાવેન વરં દાસ્યસિ શઙ્કર ।
તદા મે પિતરં ગત્વા ભાર્યાર્થં યાચયસ્વ મામ્ ॥ ૪૬॥

પતિવ્રતાત્મકં ધર્મં દેહિ મે વિઘ્નહીનકમ્ ।
તેન તુષ્ટા મહાદેવ ત્વયિ નિત્યં પરાયણા ॥ ૪૭॥

શિવ ઉવાચ ।
ત્વયોક્તં સફલં સર્વં ભવિષ્યતિ ન સંશયઃ ।
પિતરં યાચયિત્વા તે ત્વાં વરિષ્યામિ નિશ્ચિતમ્ ॥ ૪૮॥

અહો તપો હ્યહો ધૈર્યમતસ્તે દેહજો મલઃ ।
સર્વપૂજ્યો મહાદેવિ ભવિષ્યતિ ન સંશયઃ ॥ ૪૯॥

કશ્યપ ઉવાચ ।
તસ્મિન્ દિને તૃતીયા તુ ભાદ્રી શુક્લા બભૂવ હ ।
શિવેન સંયુતા દેવી ગણેશાનં પુપૂજ હ ॥ ૫૦॥

તતશ્ચતુર્થિકાયાં સા હોમં ચકાર હર્ષિતા ।
પઞ્ચમ્યાં બ્રાહ્મણૈઃ સાર્ધં પારણં જગદમ્બિકા ॥ ૫૧॥

મહોત્સવયુતા દેવી મૂર્તિં તાં ગૃહ્ય હર્ષિતા ।
જલે ચિક્ષેપ વિઘ્નેશં પ્રાર્થયામાસ યત્નતઃ ॥ ૫૨॥

તતઃ શિવો જગામૈવ સ્વસ્થાનં હર્ષસંયુતઃ ।
ગત્વા પ્રણમ્ય પિતરં પાર્વતી સંસ્થિતાઽભવત્ ॥ ૫૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે શિવપાર્વતીસમાગમો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૭.૨

## ૭.૩ મમાસુરવરપ્રદાનં નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।

ગણેશવ્રતપુણ્યેન મોહિતઃ શઙ્કરઃ સદા ।
તન્મના અભવદ્દેવો વિપ્રવેષધરો બભૌ ॥ ૧॥

હિમાચલં સમાગમ્ય સ્મૃત્વા વિઘ્નેશ્વરં શિવઃ ।
નાનાકલાં પ્રદર્શ્યૈવ મોહયામાસ તં ક્ષણાત્ ॥ ૨॥

હિમાચલો જગાદૈવ વરં વૃણુ યમિચ્છસિ ।
દાસ્યામિ મદધીનં ચેન્નાત્ર કાર્યા વિચારણા ॥ ૩॥

દ્વિજ ઉવાચ ।
ઉમાં દેહિ નગાધીશ નાન્યં યાચે વરં પરમ્ ।
તતઃ સ ખેદસંયુક્તસ્તૂષ્ણીમેવાઽભવદ્ગિરિઃ ॥ ૪॥

તં ચાતિશોકસંયુક્તં દૃષ્ટ્વોવાચ જગન્મયી ।
ઉમા તં દેહિ માં તાત શિવોઽયં નાત્ર સંશયઃ ॥ ૫॥

તતઃ સ હર્ષિતોઽત્યન્તં દદૌ તસ્મૈ સુતાં પ્રિયે ।
શિવઃ સ્વસ્થાનમાગમ્ય દેવૈઃ સમ્માનિતોઽભવત્ ॥ ૬॥

લગ્નં શુભં સમાલોક્ય પૂજયિત્વા ગજાનનમ્ ।
દેવાદિભિઃ સમાયુક્તઃ પર્વતેશં યયૌ શિવઃ ॥ ૭॥

હિમાચલઃ પ્રસન્નાત્મા વિવાહમકરોત્તતઃ ।
શિવયોર્ભક્તિસંયુક્તો બ્રાહ્મણૈર્વેદપારગૈઃ ॥ ૮॥

શિવાં ગૃહ્ય મહેશાનઃ કૈલાસમગમત્ સ્વયમ્ ।
તયા રેમે મહાયોગી તતઃ સ્કન્દો બભૂવ હ ॥ ૯॥

(Page  ખં. ૭ અ. ૩ પાન ૬)
ગણેશાનં સમારાધ્ય તારકં દૈત્યનાયકમ્ ।
જઘાન સુખસંયુક્તં ચકાર સચરાચરમ્ ॥ ૧૦॥

શિવઃ શક્ત્યા સમાયુક્તો મોહિતો માયયા ભૃશમ્ ।
તદધીનસ્વભાવેનાઽતિષ્ઠન્નિત્યં મહાસતી ॥ ૧૧॥

કદાચિત્ પાર્વતી દેવી સખીભિઃ સંવૃતા સ્થિતા ।
મનસા ધારયામાસ ધન્યાઽહં સર્વભાવતઃ ॥ ૧૨॥

શિવં ત્યક્ત્વા દક્ષગૃહે ગતાઽહં માનસંયુતા ।
દેહં ત્યક્ત્વા પુનર્જાતા હિમાચલગૃહે સુતા ॥ ૧૩॥

દેવેશો માં તતસ્ત્યક્ત્વા શઙ્કરઃ પર્વતાન્તરે ।
ગતઃ સ્વયં સ યાચિત્વાઽવૃણોન્ માં પિતરં પ્રભુઃ ॥ ૧૪॥

કિં ત્યક્ત્વા માં ગતઃ શમ્ભુઃ કિં પુનર્યાચિતા હ્યુત ।
અધુના મદધીનઃ સ વર્તતે નાત્ર સંશયઃ ॥ ૧૫॥

મદીયા મમતા સર્વા પૂર્ણા જાતા વિશેષતઃ ।
માનિનીનાં રહસ્યં તુ મયા સંરક્ષિતં ભવેત્ ॥ ૧૬॥

એવં મનસિ હર્ષેણ ધન્યાત્માનં નગાત્મજા ।
મેને નિત્યં તતઃ સર્વાઃ સખ્યસ્તાં વચનં જગુઃ ॥ ૧૭॥

સખ્ય ઊચુઃ ।
ધન્યા ત્વં માનિનીમધ્યે માનો જિત્વા તુ શઙ્કરમ્ ।
તપસા રક્ષિતો દેવિ ત્વદધીનઃ શિવોઽભવત્ ॥ ૧૮॥

તચ્છ્રુત્વા જગદમ્બા સાઽતીવ માનયુતાઽભવત્ ।
હાસ્યં ચકાર તત્રૈવ ચિત્રં દેવિ બભૂવ હ ॥ ૧૯॥

તસ્યા હાસ્યાત્ સમુત્પન્નઃ પુરુષઃ કામસન્નિભઃ ।
મમનામા મહાભાગો મહાન્ પર્વતસન્નિભઃ ॥ ૨૦॥

સા દૃષ્ટ્વા વિસ્મિતા દેવી સખીભિસ્તમુવાચ હ ।
કસ્ત્વં કસ્માદિહાયાતઃ કસ્ય કિં ચ ચિકીર્ષસિ ॥ ૨૧॥

પુરુષ ઉવાચ ।
તવ હાસ્યાત્ સમુત્પન્નં પુત્રં માં વિદ્ધિ માનદે ।
આજ્ઞાં કુરુ કરિષ્યામિ ત્વદીયાં સર્વભાવતઃ ॥ ૨૨॥

પાર્વત્યુવાચ ।
મયા માનઃ કૃતઃ પૂર્ણઃ તસ્માત્ ત્વં નિર્ગતઃ સ્વયમ્ ।
મમનામા ભવસ્વાદ્ય પુત્ર માનપરાયણઃ ॥ ૨૩॥

ગણેશં ભજ ભક્ત્યા ત્વં સ તે સર્વં પ્રદાસ્યતિ ।
તેન સર્વત્ર વિશ્વસ્મિન્ વિખ્યાતઃ પ્રભવિષ્યસિ ॥ ૨૪॥

તતસ્તસ્મૈ મહાદેવી દદૌ મન્ત્રં ષડક્ષરમ્ ।
ગણેશસ્ય પ્રહર્ષેણ વિધિયુક્તં સુતાય સા ॥ ૨૫॥

સ તાં પ્રણમ્ય દેવેશીં તપસે વનમાયયૌ ।

તત્રાઽઽજગામ દૈત્યેશઃ શમ્બરઃ કાલચોદિતઃ ॥ ૨૬॥

પપ્રચ્છ પાર્વતીપુત્રસ્તં દૃષ્ટ્વા કો ભવાનિતિ ।
કિમર્થમિહ સંયાતો વદ મે કારણં મહત્ ॥ ૨૭॥

શમ્બર ઉવાચ ।
વિદ્યાં દાતું મહાભાગ સમાયાતોઽહમાદરાત્ ।
સમર્થસ્ત્વં તયા નિત્યં ભવિષ્યસિ ન સંશયઃ ॥ ૨૮॥

એવમુક્ત્વા મહાદૈત્યો વિદ્યાં નાનાવિધાં દદૌ ।
આસુરીં તાં મમો નામ સાધયામાસ યત્નતઃ ॥ ૨૯॥

સાધયિત્વા સ્વયં વિદ્યાં કામરૂપો બભૂવ હ ।
નાનાસામર્થ્યસંયુક્તસ્તતો વૈ હર્ષિતોઽભવત્ ॥ ૩૦॥

શમ્બરં પ્રણિપત્યૈવ જગાદ વચનં હિતમ્ ।
ભક્તિયુક્તસ્વભાવેન કૃતાઞ્જલિરુદારધીઃ ॥ ૩૧॥

મમાસુર ઉવાચ ।
ત્વયા કૃતં મહાભાગ મહત્ કાર્યં મદીયકમ્ ।
અધુના શિષ્યભૂતં તે શાધિ માં કિં કરોમ્યહમ્ ॥ ૩૨॥

શમ્બર ઉવાચ ।
ગણેશં શક્તિદત્તેન મન્ત્રેણારાધ્ય માનદ ।
બ્રહ્માણ્ડરાજ્યમુગ્રં તં યાચયસ્વ મહાપ્રભુમ્ ॥ ૩૩॥

(Page ખં. ૭ અ. ૩ પાન ૭)
તત્ત્વૈશ્ચ તત્ત્વસમ્ભૂતૈર્ન મે મૃત્યુર્ભવેત્ પ્રભો ।
યાચસ્વ સર્વભાવેન નાન્યં કઞ્ચિદ્વરં પરમ્ ॥ ૩૪॥

વરાન્ લબ્ધ્વા મહાભાગ મદ્ગેહે સઙ્ગતો ભવ ।
પશ્ચાત્ કિઞ્ચિત્ કુરુષ્વ ત્વમિતિ યાચેઽહમાદરાત્ ॥ ૩૫॥

તથેતિ શમ્બરં સોઽપિ મમનામા જગાદ હ ।
શમ્બરઃ સ્વગૃહં ગત્વા હર્ષયુક્તો બભૂવ હ ॥ ૩૬॥

મમસ્તત્ર સમાસીનસ્તપસ્તેપે સુદારુણમ્ ।
વાયુમાત્રાશનો દેવિ ધ્યાત્વા હૃદિ ગજાનનમ્ ॥ ૩૭॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નો ગણનાયકઃ ।

પ્રાણશેષં મમં તત્ર યયૌ દાતું વરાન્ સ્વયમ્ ॥ ૩૮॥

આગતં ગણનાથં સ ન બુબોધ મહાસુરઃ ।
ધ્યાનસંસ્થં ગણાધીશસ્તમુવાચ દયાયુતઃ ॥ ૩૯॥

શ્રીગણેશ ઉવાચ ।
વરાન્ બ્રૂહિ મહાભાગ મમ તે હૃદિ સંસ્થિતાન્ ।
દાસ્યામિ તપસા તુષ્ટો મન્ત્રસેવનતઃ પરમ્ ॥ ૪૦॥

ગણેશવચનં શ્રુત્વા મમ ઉન્મીલ્ય લોચને ।
પશ્યન્ વિઘ્નેશ્વરં સોઽપિ સત્તાયુક્તો બભૂવ હ ॥ ૪૧॥

ઉત્થાય તં નમસ્કૃત્ય પૂજયામાસ ભક્તિતઃ ।
પુનઃ પ્રણમ્ય તં સ્તોતું સ્તોત્રં સોઽપિ સમારભત્ ॥ ૪૨॥

મમાસુર ઉવાચ ।
નમસ્તે ગણનાથાય ગણાનાં પતયે નમઃ ।
ગણપદપ્રદાત્રે તે ગણરૂપપ્રધારિણે ॥ ૪૩॥

વિઘ્નાનાં પતયે તુભ્યં વિઘ્નાનાં વિઘ્નરૂપિણે ।
ભક્તાનાં વિઘ્નહન્ત્રે તે ઇતરેષાં પ્રહારિણે ॥ ૪૪॥

અનાથાનાં પ્રણાનાથ નાથાય નાથદાયિને ।
નાથાનાં નાથરૂપાયાનાથાય તુ નમો નમઃ ॥ ૪૫॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મભ્યો બ્રહ્મદાયિને ।
બ્રહ્મણે બ્રાહ્મણાનાં ચ પાલકાય નમો નમઃ ॥ ૪૬॥

અમેયશક્તયે ચૈવ શક્તિરૂપધરાય તે ।
શક્તિભ્યઃ શક્તિદાત્રે તે શક્તિશક્તે નમો નમઃ ॥ ૪૭॥

પરેશાય પરેભ્યસ્તુ પરપદપ્રદાયિને ।
પરાય પરરૂપાય પરાત્પર નમોઽસ્તુ તે ॥ ૪૮॥

જ્યેષ્ઠરાજાય જ્યેષ્ઠેભ્યઃ પરપદપ્રદાયિને ।
જ્યેષ્ઠાય જ્યેષ્ઠહીનાય માત્રે પિત્રે નમો નમઃ ॥ ૪૯॥

વિઘ્નેશ્વરાનન્તવિહારકારિન્ સ્વાનન્દદાત્રે સકલાનુગોપ્ત્રે ।
સિદ્ધેશ્ચ બુદ્ધેઃ પતયે પરાત્મન્ હેરમ્બ સર્વત્ર નમો નમસ્તે ॥ ૫૦॥

કિં સ્તૌમિ યોગપ્રદમેકદન્તં યોગસ્વરૂપં પરમાર્થભૂતમ્ ।

સ્તોતું ન શક્તાઃ પ્રભવન્તિ વેદાઃ શમ્ભ્વાદયો યોગિન એવ ઢુણ્ઢિમ્ ॥ ૫૧॥

ધન્યોઽહં સર્વભાવેભ્યો દૃષ્ટ્વા દેવં ગજાનનમ્ ।
અગમ્યં યોગિનાં સાક્ષાત્ કૃતકૃત્યોઽહમઞ્જસા ॥ ૫૨॥

વરદોઽસિ ગણાધીશ તદા મે તત્ત્વભિઃ કદા ।
ન ભવેત્તદ્ભવેભ્યો વૈ મરણં ત્વત્પ્રસાદતઃ ॥ ૫૩॥

યદ્યદિચ્છામિ તત્તન્ મે સફલં ભવતુ પ્રભો ।
આરોગ્યાદિ સમાયુક્તં માં કુરુષ્વ ગજાનન ॥ ૫૪॥

રાજ્યં બ્રહ્માણ્ડગોલસ્ય દેહિ મે વાઞ્છિતપ્રદ ।
સઙ્ગ્રામે ન સમં તત્ર કિઞ્ચિદ્ભવતુ વિઘ્નપ ॥ ૫૫॥

સદા વિજયસંયુક્તમજેયં શઙ્કરાદિભિઃ ।
માં કુરુષ્વ ગણાધીશામોઘશસ્ત્રપ્રધારિણમ્ ॥ ૫૬॥

શ્રીગણેશ ઉવાચ ।
દુર્ઘટં કથિતં સર્વં ત્વયા દૈત્યેન્દ્રનાયક ।
તુષ્ટસ્તથાપિ દાસ્યામિ ત્વયોક્તં તે ભવિષ્યતિ ॥ ૫૭॥

સ્તોત્રં ભવત્કૃતં મે ચ કામદં કામમિચ્છતે ।
ભવિષ્યતિ ન સન્દેહો ભુક્તિમુક્તિપ્રદં તથા ॥ ૫૮॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મણાં પતિઃ ।
મમાસુરઃ પ્રસન્નાત્માઽભવચ્છમ્બરગેહગઃ ॥ ૫૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે મમાસુરવરપ્રદાનં નામ તૃતીયોઽધ્યાયઃ ॥ ૭.૩

## ૭.૪ શિવમમાસુરસમાગમો નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।
શમ્બરં પ્રણિપત્યાદૌ કથયામાસ વિસ્તરાત્ ।
વૃત્તાન્તં મમનામાઽસૌ હર્ષિતં તં ચકાર હ ॥ ૧॥

મોહિનીં પ્રદદૌ તસ્મૈ સ્વપુત્રીં શમ્બરાસુરઃ ।
તયા ચ સંસ્થિતો રેમે પ્રિયે તત્ર મમાસુરઃ ॥ ૨॥

તતઃ સ્વલ્પે ગતે કાલે શમ્બરઃ શુક્રમાયયૌ ।
તં પ્રણમ્ય મહાભાગં વૃત્તાન્તં પ્રજગાદ હ ॥ ૩॥

તતઃ શુક્રેણ દૈત્યેન્દ્રાઃ પ્રેરિતાઃ સર્વ આયયુઃ ।
સ્વયં શમ્બરસંયુક્તો જગામ હ મમાસુરમ્ ॥ ૪॥

શુક્રં સમાગતં દૃષ્ટ્વા મમાસુરઃ પ્રતાપવાન્ ।
તં પ્રણમ્ય મહાભાગં કૃતાઞ્જલિઃ પુરઃ સ્થિતઃ ॥ ૫॥

પૂજયામાસ તં વિપ્રં હર્ષયુક્તેન ચેતસા ।
પ્રણમ્ય ચાઽઽજ્ઞયા તસ્યાઽઽસનેઽસૌ સંસ્થિતોઽભવત્ ॥ ૬॥

તતો દૈત્યગણાસ્તત્ર સમાજગ્મુઃ પ્રહર્ષિતાઃ ।
તાન્ સર્વાન્ માનયામાસ યથાવિધિ મમાસુરઃ ॥ ૭॥

તતઃ સર્વમતં ગૃહ્ય કાવ્યો નીતિવિશારદઃ ।
બ્રાહ્મણૈસ્તં ચાભિષિચ્ય દૈત્યાધીશં ચકાર હ ॥ ૮॥

પ્રધાનાઃ પઞ્ચ તસ્યાપિ બભૂવુર્બલસંયુતાઃ ।
પ્રેતઃ કાલઃ કલાપશ્ચ કાલજિત્ ધર્મહા પ્રિયે ॥ ૯॥

દૈત્યા દાનવભૂપાશ્ચ રાક્ષસાદય આદરાત્ ।
હર્ષયુક્તા બભૂવુસ્તે તતઃ સ્વસ્વગૃહે ગતાઃ ॥ ૧૦॥

ચિન્તાનાશં મમો ભૂમ્યાં નિર્મમે નગરં પરમ્ ।
સર્વશોભાસમાયુક્તં પરિખાવલયાઙ્કિતમ્ ॥ ૧૧॥

તત્ર નાના જના જગ્મુર્વાસાર્થં વિષયપ્રિયાઃ ।
વર્ણાશ્રમયુતાઃ સર્વે વાસં ચક્રુઃ પ્રહર્ષિતાઃ ॥ ૧૨॥

દૈત્યાદ્યાસ્તત્ર સંરેજુર્વિશેષેણ નિવાસકાઃ ।
રાજા મમાસુરસ્તાન્ વૈ પાલયામાસ હર્ષિતઃ ॥ ૧૩॥

પુત્રૌ દ્વૌ સમશીલૌ તુ મોહિન્યાં સમ્બભૂવતુઃ ।
મમાસુરાન્ મહાતેજો યુક્તૌ દૈત્યવિવર્ધિનૌ ॥ ૧૪॥

ધર્માધર્મૌ તયોર્નામ ચક્રિરે બ્રાહ્મણાદયઃ ।
તાભ્યાં મમાસુરોઽત્યન્તં રેજે તેજોયુતો મહાન્ ॥ ૧૫॥

એકદા શ્વશુરેણાઽસૌ સમાનાય્ય મહામુનિમ્ ।
ઉશનસં પ્રણમ્યાઽઽદૌ જગાદ વચનં પરમ્ ॥ ૧૬॥

મમાસુર ઉવાચ ।
તવ સ્વામિન્ પ્રસાદેન સમર્થોઽહં ન સંશયઃ ।
પ્રજેષ્યામિ વિશેષેણ બ્રહ્માણ્ડં લોકસઙ્કુલમ્ ॥ ૧૭॥

આજ્ઞાપય મહાયોગિન્ ત્વદાજ્ઞાવશવર્તિનમ્ ।
(Page ખં. ૭ અ. ૪ પાન ૯)
દાસં માં શાધિ વિપ્રેન્દ્ર તવેચ્છા કીદૃશી ભવેત્ ॥ ૧૮॥

કશ્યપ ઉવાચ ।
મમાસુરસ્ય વાક્યં સ શ્રુત્વા વેદવિદાં વરઃ ।
શુક્રસ્તં ભક્તિસંયુક્તં દૃષ્ટ્વોવાચ સુરૂપિણમ્ ॥ ૧૯॥

શુક્ર ઉવાચ ।
ગણેશવરદાનેન સમર્થોઽસિ મહાસુર ।
ગણેશભક્તિસંયુક્તો જય ત્વં વિશ્વમઞ્જસા ॥ ૨૦॥

કદાચિદપિ દૈત્યેશ દ્વેષં વિઘ્નેશ્વરસ્ય ચ ।
મા કુરુષ્વ તદા રાજ્યં કરિષ્યસિ વિશેષતઃ ॥ ૨૧॥

તથેતિ દૈત્યમુખ્યસ્તં જગાદ હર્ષસંયુતઃ ।
તતોઽસુરાન્ સમાહૂય વૃત્તમાકથયત્પરમ્ ॥ ૨૨॥

તે સર્વે હર્ષસંયુક્તાઃ સાધુ સાધ્વબ્રુવન્ વચઃ ।
દ્વિજૈર્મુહૂર્તમાલોક્ય નિર્યયૌ ચ મમાસુરઃ ॥ ૨૩॥

અપારસેનયા યુક્તશ્ચતુરઙ્ગપ્રભૂતયા ।
નાનાવાહનગા દૈત્યા દૈત્યેન્દ્રા રેજુરઞ્જસા ॥ ૨૪॥

સન્નદ્ધા વીરમુખ્યાશ્ચ સમાજગ્મુર્મહાસુરમ્ ।
મહાબલા મહાવીર્યાઃ પર્વતોન્મૂલને ક્ષમાઃ ॥ ૨૫॥

પ્રધાનૈર્યુદ્ધમાર્ગજ્ઞૈઃ પુત્રાભ્યાં સંયુતઃ સ્વયમ્ ।
મમાસુરો રથે સંસ્થઃ શુશુભે તેજસા યુતઃ ॥ ૨૬॥

પૃથ્વીં જેતું મહાવીરા જગ્મુર્દ્વીપસમન્વિતામ્ ।
જિત્વા ક્ષત્રગણાન્ સર્વાન્ સ્વવશે તાંસ્તુ ચક્રિરે ॥ ૨૭॥

તતઃ પાતાલગાઃ સર્વે શેષં જિત્વા મહાબલમ્ ।

યયુઃ સ્વર્ગેષુ દૈત્યેન્દ્રા ઇન્દ્રં ક્રોધસમન્વિતાઃ ॥ ૨૮॥

ઇન્દ્રઃ સુરગણૈઃ સાર્ધં યોદ્ધું સમુદ્યતોઽભવત્ ।
ઐરાવતસમારૂઢો યયૌ સઙ્ગ્રામમણ્ડલમ્ ॥ ૨૯॥

દૈત્યેન્દ્રા શસ્ત્રસઙ્ઘાતૈર્મર્દયિત્વા સુરેન્દ્રકાન્ ।
મમાસુરં યયુઃ સર્વે ધૃત્વેન્દ્રં તે પ્રહર્ષિતાઃ ॥ ૩૦॥

ઇન્દ્રાસનસમારૂઢો મમાસુરઃ પ્રતાપવાન્ ।
શુશુભે દાનવેન્દ્રૈઃ સ સેવ્યમાનઃ સદારુણૈઃ ॥ ૩૧॥

સત્યલોકાગતં વીક્ષ્ય દૂતં સમ્પ્રેષ્ય દારુણમ્ ।
યોદ્ધું સમુદ્યતં જ્ઞાત્વા વેધાઃ પપાલ તદ્ભયાત્ ॥ ૩૨॥

વિષ્ણું ગત્વા વિધાતાઽસૌ રક્ષ રક્ષેતિ ચાબ્રવીત્ ।
વિષ્ણુસ્તં ગૃહ્ય શમ્ભું વૈ શરણં પ્રજગામ હ ॥ ૩૩॥

જ્ઞાત્વા વૃત્તાન્તમેવં સ મમાસુરઃ પ્રતાપવાન્ ।
કૈલાસમાયયૌ દૈત્યૈર્યોદ્ધું મહેશ્વરેણ હ ॥ ૩૪॥

શિવલોકે સમાયાતો ભાનુઃ શક્તિસ્તથા ભયાત્ ।
વિચાર્ય દેવપાઃ સર્વે દૈત્યેદ્રં જગ્મુરાવૃતાઃ ॥ ૩૫॥

મરણે નિશ્ચયં કૃત્વા શમ્ભુમુખ્યાઃ સુરેશ્વરાઃ ।
મમાસુરં તં સન્નદ્ધાઃ પ્રયયુસ્તે સુલોચને ॥ ૩૬॥

મમાસુરસ્ય સૈન્યં તુ સન્નદ્ધં ક્રોધસંયુતમ્ ।
દેવેન્દ્રાન યોદ્ધુમાયાતં નાનાવીરપ્રપાલિતમ્ ॥ ૩૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે શિવમમાસુરસમાગમો નામ ચતુર્થોઽધ્યાયઃ ॥ ૭.૪

## ૭.૫ મમાસુરરાજ્યભોગવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।
સમાગતાન્ પુરો દેવાન્ દૃષ્ટ્વા ક્રોધસમન્વિતાઃ ।
દૈત્યાઃ પ્રહરણૈર્જઘ્નુઃ શસ્ત્રાસ્ત્રૈર્મર્મભેદિભિઃ ॥ ૧॥

દેવાઃ ક્રોધયુતાસ્તદ્વજ્જઘ્નુસ્તાન્ દૈત્યપુઙ્ગવાન્ ।

અન્યોન્યં મિલિતાઃ સર્વે એકીભૂતા યથાઽભવન્ ॥ ૨॥

રજસ્તિમિરભાવેન સ્વપરજ્ઞાનવર્જિતાઃ ।
પુરોગાગ્જઘ્નિરે સર્વે સ્વાન્ પરાનપિ દુર્મદાઃ ॥ ૩॥

દિનૈકં દારુણં યુદ્ધં બભૂવે વીરમોહનમ્ ।
તતઃ શોણિતજા ઘોરા નદી તત્ર પ્રસુસ્રુવે ॥ ૪॥

તતો રજોઽભવચ્છાન્તં પ્રકાશસંયુતાઃ પુનઃ ।
દૈત્યા દેવા વિવેકેન યુયુધુર્જાતસમ્ભ્રમાઃ ॥ ૫॥

તતો દૈત્યબલૈર્ભગ્નં દેવસૈન્યં સુદારુણમ્ ।
પપાલ દૈત્યસઙ્ઘૈસ્તદ્ધતં હર્ષસમન્વિતૈઃ ॥ ૬॥

તતો ભૈરવમુખ્યાશ્ચ વિષ્વક્સેનાદયો યયુઃ ।
આદિત્યાઃ કાલિમુખ્યાશ્ચ શક્તયઃ ક્રોધસંયુતાઃ ॥ ૭॥

તૈઃ સમન્તાન્ મહાસ્ત્રૈસ્તદ્બલં સમ્મર્દિતં પરમ્ ।
દૈત્યાનાં ભયસંયુક્તં પપાલ ચ દિશો દશ ॥ ૮॥

તતઃ ક્રોધસમાયુક્તાઃ પ્રધાના મમકસ્ય તે ।
જગ્મુઃ પ્રહરણૈર્વીક્ષ્ય શસ્ત્રૈર્જઘ્નુઃ સુરેન્દ્રકાન્ ॥ ૯॥

દૈત્યપૈર્ભૈરવાદ્યાશ્ચ યુયુધુર્જાતસમ્ભ્રમાઃ ।
યુદ્ધં તત્રાઽભવદ્ઘોરં દિનૈકં જયમિચ્છતામ્ ॥ ૧૦॥

તતો દૈત્યેન્દ્રમુખ્યાસ્તે પતિતા મૂર્ચ્છયા યુતાઃ ।
પપાલાસુરસૈન્યં તદ્ભયયુક્તં દિશો દશ ॥ ૧૧॥

જ્ઞાત્વા મમાસુરસ્યૈવ પુત્રૌ દ્વૌ સમુપસ્થિતૌ ।
પ્રણમ્ય પિતરં તૌ તુ યોદ્ધું જગ્મતુરાદરાત્ ॥ ૧૨॥

તતઃ કાવ્યેન દૈત્યેન્દ્રા જીવિતાઃ પુનરુત્થિતાઃ ।
યુયુધુસ્તે મહાવીરા દેવૈઃ પરમદારુણાઃ ॥ ૧૩॥

દૈત્યૈર્ધર્મશ્ચ સઙ્ક્રુદ્ધોઽધર્મઃ શસ્ત્રાસ્ત્રવર્ષિણૌ ।
બભૂવતુશ્ચ દેવેન્દ્રાન્ મૂર્ચ્છિતાંશ્ચક્રતુર્મૃધે ॥ ૧૪॥

ન કોઽપિ દેવસૈન્યસ્થસ્તયોરસ્ત્રબલં પરમ્ ।
અસહત્તતો દેવાઃ પ્રપેલુર્ભયસંયુતાઃ ॥ ૧૫॥

તતઃ શિવઃ સ્વયં ક્રુદ્ધો વૃષારૂઢઃ સમાયયૌ ।
અનુ તં જગદમ્બા સા ભાનુર્વિષ્ણુર્યયૌ પુરઃ ॥ ૧૬॥

તેષાં યુદ્ધં મહાઘોરં બભૂવે રોમહર્ષણમ્ ।
ન વક્તું શક્યતે દેવિ બ્રહ્માણ્ડભયકારકમ્ ॥ ૧૭॥

અધર્મો વિષ્ણુના સાર્ધં ધર્મઃ શઙ્કરમાયયૌ ।
કાલજિદ્ભાનુના સાર્ધં પ્રેતઃ શક્ત્યા મહાબલઃ ॥ ૧૮॥

કપાલઃ કાલરુદ્રેણ કાલ્યા ધર્મઘ્ન એવ ચ ।
નિયતં યુયુધુઃ સર્વે શસ્ત્રાસ્ત્રૈર્મર્મભેદિભિઃ ॥ ૧૯॥

દિનૈકં દારુણં યુદ્ધં બભૂવે દેવરક્ષસામ્ ।
તતઃ કાલ્યા હતઃ પાપી ધર્મઘ્નશ્ચ મૃતોઽભવત્ ॥ ૨૦॥

કપાલઃ કાલરુદ્રેણ ત્રિશૂલેન પ્રમૂર્च્છિતઃ ।
પ્રેતઃ શક્ત્યા હતસ્તત્ર મમાર ખડ્ગઘાતતઃ ॥ ૨૧॥

ત્રિશૂલેન હતો ધર્મઃ શિવેનામૂર્च્છિતોઽભવત્ ।
ચક્રેણ વિષ્ણુના તદ્વદધર્મો મૂર્च્છિતઃ કૃતઃ ॥ ૨૨॥

ચક્રત્રિશૂલકાદ્યૈશ્ચ શસ્ત્રાસ્ત્રૈર્દૈત્યસૈન્યકમ્ ।
હતં સર્વત્ર દેવેશૈર્હાહાકારરવાકુલમ્ ॥ ૨૩॥

શોણિતૌઘા મહાનદ્યસ્તત્ર જાતા ભયાનકાઃ ।
છિન્નભિન્નાશ્ચ દૈત્યાદ્યાઃ પપ્લુઃ સર્વતોદિશમ્ ॥ ૨૪॥

તત્રાઽપિ શસ્ત્રવેગેન મૃતાઃ કેઽપિ સુલોચને ।
તતો મમાસુરઃ ક્રુદ્ધઃ સઙ્ગ્રામાય યયૌ સ્વયમ્ ॥ ૨૫॥

પુરઃ સ્થિતં શિવં વીક્ષ્ય જગાદ ક્રોધસંયુતઃ ।
(Page ખં. ૭ અ. ૫ પાન ૧૧)
સર્વસંહારકં સોઽપિ મહાબલપરાક્રમઃ ॥ ૨૬॥

મમાસુર ઉવાચ ।
તિષ્ઠ તિષ્ઠ મહાદેવ પશ્ય મે પૌરુષં પરમ્ ।
દૃષ્ટં ત્વદીયં સામર્થ્યં સર્વદેવાતિગં મયા ॥ ૨૭॥

એવમુક્ત્વા મહાદેવં ધનુઃ સજ્જમથાઽકરોત્ ।
નિષ્કાશ્ય સુદૃઢં બાણં મુમોચ દૈત્યનાયકઃ ॥ ૨૮॥

તાવત્ ત્રિશૂલકં શમ્ભુશ્ચિક્ષેપ નાશકારકમ્ ।
મમાસુરં સમાસાદ્ય નિષ્ફલં તદ્બભૂવ હ ॥ ૨૯॥

બાણેન સ હતઃ શમ્ભુઃ પપાત ધરણીતલે ।
મૂર્ચ્છયા પીડિતોઽત્યન્તં સહસા દૈત્યપાલિનિ ॥ ૩૦॥

તતો મમાસુરઃ ક્રુદ્ધો બાણેનૈકેન વક્ષસિ ।
વિવ્યાધ માધવં દેવં મૂર્ચ્છિતં તં ચકાર હ ॥ ૩૧॥

શક્તિઃ સૂર્યસ્તતઃ ક્રુદ્ધૌ બાણાન્ ચિક્ષિપતુઃ પરાન્ ।
તે સર્વે નિષ્ફલા બાણાઃ પેતુઃ પરમદારુણાઃ ॥ ૩૨॥

તતો મમાસુરઃ સૂર્યં શક્તિં વિવ્યાધ વક્ષસિ ।
એકૈકેન સ બાણેન પતિતૌ ધરણીતલે ॥ ૩૩॥

બાણવૃષ્ટિં મહોગ્રાં સ ચક્રે ક્રોધસમન્વિતઃ ।
તયા દેવેન્દ્રમુખ્યાશ્ચ દેવાઃ સમ્મર્દિતા મૃધે ॥ ૩૪॥

તતો દેવાન્ મૃતાન્ વીક્ષ્ય કાંશ્ચિદ્ભયસમન્વિતાન્ ।
પલતો દૈત્યરાજઃ સ હર્ષિતોઽભૂન્ મહામતે ॥ ૩૫॥

દેવાન્ શમ્ભુમુખાન્ ગૃહ્ય યયૌ સ્વસ્થાનમુત્તમમ્ ।
કાવ્યેન જીવિતાન્ દૈત્યાન્ પ્રધાનપુત્રમુખ્યકાન્ ॥ ૩૬॥

તતો ધર્મં મહાદૈત્યઃ કૈલાસાધિપતિં સુતમ્ ।
અધર્મં વિષ્ણુલોકસ્ય નાથં ચકાર હર્ષિતઃ ॥ ૩૭॥

પ્રેતં શક્તિપુરસ્યાપિ કપાલં સ ચકાર હ ।
સૌરલોકાધિપં વીરં ધર્મઘ્નં બ્રહ્મણસ્તથા ॥ ૩૮॥

કાલજિતં મહેન્દ્રસ્ય યમસ્ય કાલકં પરમ્ ।
લોકસ્ય ચાધિપં ચક્રે તથાઽન્યેષાં ચ દાનવાન્ ॥ ૩૯॥

તતઃ સ્વપુરમાગમ્ય કારાગારે સમાક્ષિપત્ ।
દેવેન્દ્રાન્ શિવમુખ્યાન્ સ રાજ્યં ચક્રે મહાબલઃ ॥ ૪૦॥

બ્રહ્માણ્ડાધિપતિર્દુષ્ટો બભૂવ સ મમાસુરઃ ।
કૃતકૃત્યમિવાત્માનં મેને દૈત્યેન્દ્રસંયુતઃ ॥ ૪૧॥

સ્ત્રીમાંસમદિરાયુક્તો બભૂવે ભોગલાલસઃ ।
અવિનાશં સ્વમાત્માનં મેને દેહધરોઽપિ સન્ ॥ ૪૨॥

તતોઽતિમદસંયુક્તો મમાસુરઃ પ્રતાપવાન્ ।
દેવાઙ્ગના નરાણાં તુ કન્યા નાગોદ્ભવા બલાત્ ॥ ૪૩॥

સમાનાય્યાસુરેન્દ્રૈઃ સ બુભુજે પાપનિશ્ચયઃ ।
તતો બહુગતે કાલે દૈત્યેન્દ્રાન્ પ્રેષ્ય દારુણાન્ ॥ ૪૪॥

ખલઃ ખણ્ડનકં ચક્રે વર્ણાશ્રમસુકર્મણામ્ ।
આસુરં કર્મ સર્વત્ર સ્થાપયામાસ દણ્ડતઃ ॥ ૪૫॥

ન સ્વાહા ન સ્વધા કુત્ર ભવતિ સ્મ કદાચન ।
ન વષટ્કારભાવશ્ચ વર્ણસઙ્કરભાવતઃ ॥ ૪૬॥

ઋષયસ્તાડિતાઃ કેચિત્ કેચિદ્બન્ધનસંયુતાઃ ।
દેવસ્થાનાનિ સર્વાણિ ખણ્ડિતાનિ ચ દાનવૈઃ ॥ ૪૭॥

તીર્થાનિ પુણ્યવૃક્ષાસ્તે બભઞ્જુઃ પાપકારકાઃ ।
મમાસુરાત્મકં કર્મ ચક્રિરે સર્વમાનવૈઃ ॥ ૪૮॥

પ્રતિમા દૈત્યનાથસ્ય સ્થાપિતાઃ સર્વમન્દિરે ।
ઇત્યાદિકર્મનાશશ્ચ બભૂવ જગતીતલે ॥ ૪૯॥

હાહાકારયુતાઃ સર્વે ભ્રષ્ટા જાતાઃ સુલોચને ।
વર્ણાશ્રમવિહીનાસ્તે જના દુઃખસમન્વિતાઃ ॥ ૫૦॥

રાજ્યં ચકાર દૈત્યેશો મમાસુરઃ સુહર્ષિતઃ ।
વૃષ્ટ્યાદિકમભૂત્તત્ર કાલે સર્વં ભયાકુલમ્ ॥ ૫૧॥

(Page ખં. ૭ અ. ૬ પાન ૧૨)
એવં પાપે પ્રવૃદ્ધે તુ દેવાશ્ચોપોષણાન્વિતાઃ ।
કારાગારે સ્થિતાઃ સર્વે બભૂવુઃ શોકપીડિતાઃ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે મમાસુરરાજ્યભોગવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૭.૫

## ૭.૬ વિઘ્નરાજપ્રાદુર્ભાવો નામ ષષ્ઠોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।

તતઃ શમ્ભુમુખા દેવા વિચારં દુઃખસંયુતાઃ ।
મમાસુરસ્ય નાશાર્થં ચક્રુઃ સર્વે ભયાતુરાઃ ॥ ૧॥

તત્ર વિષ્ણુર્મહાબુદ્ધિરુવાચ વાક્યમુત્તમમ્ ।
દેવાન્ સર્વાન્ સમાશ્વાસ્ય વિઘ્નરાજં હૃદિ સ્મરન્ ॥ ૨॥

વિષ્ણુરુવાચ ।
કારાગારે વયં ક્ષિપ્તાસ્તત્ર કર્મપ્રખણ્ડનાત્ ।
ઉપોષણસમાયુક્તાઃ કૃતા મમાસુરેણ ચ ॥ ૩॥

અતિપાપં મમસ્યૈવ રાજ્યે વૃત્તં મહેશ્વરાઃ ।
તેન પુણ્યવિહીનોઽયં મરિષ્યતિ ન સંશયઃ ॥ ૪॥

સર્વસત્તાધરઃ પ્રોક્તો ગણેશો વેદવાદિભિઃ ।
વિઘ્નરાજશ્ચ તેનાઽસૌ નામાઽભૂદ્ધર્મપાલકઃ ॥ ૫॥

આપદ્ધર્મવિધાનેન તદુપાસનકં પરમ્ ।
કરિષ્યામો વિશેષેણ સ એનં ઘાતયિષ્યતિ ॥ ૬॥

તત્ત્વપ્રકાશકઃ સોઽપિ ન તત્ત્વરૂપધારકઃ ।
તત્ત્વહીનો ન દેવેશા અત એનં વધિષ્યતિ ॥ ૭॥

અતિવિષયસંયુક્તો દૈત્યેન્દ્રૈર્મોહિતો ભૃશમ્ ।
મમાસુરો ગણેશાનં ત્યક્ત્વા ભોગપરોઽધુના ॥ ૮॥

અન્યચ્ચ શ‍ૃણુત પ્રાજ્ઞાઃ ક્ષેત્રેષુ વિઘ્નપસ્ય ચ ।
મૂર્તયઃ ખણ્ડિતાઃ સર્વાઃ સ્વકીયાઃ સ્થાપિતાઃ ખલૈઃ ॥ ૯॥

આદૌ ગણપતેઃ પ્રોક્તં પૂજનં સ્મરણાદિકમ્ ।
તત્કર્મસુ મમેનૈવ ખણ્ડિતં ભૂમિમણ્ડલે ॥ ૧૦॥

અતો વિઘ્નેશ્વરશ્ચૈનં મારયિષ્યતિ નિશ્ચિતમ્ ।
તં વિશેષેણ ભજત દેવા ભાવસમન્વિતાઃ ॥ ૧૧॥

વિષ્ણોર્વચનમાકર્ણ્ય દેવાઃ શમ્ભુપુરોગમાઃ ।
સાધુ સાધુ ત્વયા પ્રોક્તં જગુસ્તં કેશવં પ્રિયે ॥ ૧૨॥

તતો દેવા ગણેશાનં ચિન્ત્ય સઙ્કટમુક્તયે ।
મન્ત્રસ્નાનં પ્રચક્રુસ્તે ન્યાસાદીંશ્ચ મનોમયાન્ ॥ ૧૩॥

ધ્યાત્વા ગણપતિં સર્વે પુપૂજુર્માનસૈઃ પૃથક્ ।

ઉપચારૈરનેકૈસ્તે જેપુર્મન્ત્રં હૃદા પરમ્ ॥ ૧૪॥

એકાક્ષરવિધાનેન યુક્તાસ્તેપુસ્તપો મહત્ ।
સઙ્ગોપ્ય ભયસંયુક્તા નિરાહારપરાયણાઃ ॥ ૧૫॥

એવં વર્ષશતે પૂર્ણે તાન્ યયૌ ગણનાયકઃ ।
ભાદ્રશુક્લચતુર્થ્યાં તુ મધ્યાહ્ને વરદાયકઃ ॥ ૧૬॥

તં દૃષ્ટ્વા હર્ષસંયુક્તા દેવા ઉત્થાય સત્વરમ્ ।
પ્રણેમુઃ પૂજયામાસુર્માનસૈરુપચારકૈઃ ॥ ૧૭॥

પુનઃ પ્રણમ્ય વિઘ્નેશં તુષ્ટુવુઃ કરસમ્પુટાઃ ।
સાશ્રુનેત્રાઃ પ્રિયે દેવા ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૧૮॥

(Page ખં. ૭ અ. ૬ પાન ૧૩)
દેવેન્દ્રા ઊચુઃ ।
નમસ્તે વિઘ્નરાજાય ભક્તવિઘ્નવિદારણ ।
અભક્તેભ્યો વિશેષેણ વિઘ્નદાત્રે નમો નમઃ ॥ ૧૯॥

ગણેશાય પરેશાય હેરમ્બાય નમો નમઃ ।
ચતુર્બાહુધરાયૈવ નાગેશધ્વજિને નમઃ ॥ ૨૦॥

અમેયાયાપ્રતાર્ક્યાય સદા સ્વાનન્દવાસિને ।
બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મદાત્રે નમો નમઃ ॥ ૨૧॥

સાઙ્ખ્યાય બોધરૂપાય પુરુષાય પરાત્મને ।
ગણેશાય પ્રકૃતયે ત્રિગુણાય નમો નમઃ ॥ ૨૨॥

સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે પ્રકાશરૂપધારિણે ।
મોહકાય ત્રિલોકસ્થનાથાય તે નમો નમઃ ॥ ૨૩॥

નાનામાયાપ્રચાલાય માયિભ્યો માયયા પ્રભો ।
મોહદાય વિશેષેણ માયિકાય નમો નમઃ ॥ ૨૪॥

નાનાભેદમયં બ્રહ્મ વિઘ્નયુક્તં ન સંશયઃ ।
તત્રાનન્દયુતાયૈવ સમભાવાય તે નમઃ ॥ ૨૫॥

સર્વભેદવિહીનં યદ્બ્રહ્મામૃતમયં પરમ્ ।
ભેદહીનેન વિઘ્નેન યુતં શાસ્ત્રપ્રમાણતઃ ॥ ૨૬॥

ભેદયુક્તં ગણાધીશ ભેદહીનં ત્વયા પરમ્ ।

સૃષ્ટં દ્વન્દ્વમયં નાથ તયોર્નાથાય તે નમઃ ॥ ૨૭॥

આનન્દં પરમં બ્રહ્મ વિઘ્નાનાં હારકં મતમ્ ।
દાયકં તત્ત્વમેવેતિ વિઘ્નરાજ નમોઽસ્તુ તે ॥ ૨૮॥

તં વિઘ્નરાજરાજં તુ પશ્યામશ્ચર્મચક્ષુષા ।
ધન્યા વયં ગણાધીશ તવ પાદસ્ય દર્શનાત્ ॥ ૨૯॥

એવમુક્ત્વા પ્રણેમુસ્તે દેવાઃ શમ્ભુપુરોગમાઃ ।
સ તાનુવાચ વિઘ્નેશો ભક્ત્યા સ્તોત્રેણ યન્ત્રિતઃ ॥ ૩૦॥

શ્રીવિઘ્નરાજ ઉવાચ ।
વરાન્ બ્રૂત મહાદેવા યેષાં યાન્ મનસીપ્સિતાન્ ।
દાસ્યામિ સ્તોત્રસન્તુષ્ટસ્તપસા ધ્યાનશાલિના ॥ ૩૧॥

ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં ભવેત્ ।
પઠતે શ◌ૃણ્વતે દેવા વાઞ્છિતાર્થપ્રદાયકમ્ ॥ ૩૨॥

ગણેશવચનં શ્રુત્વા દેવા હર્ષસમન્વિતાઃ ।
પ્રણમ્ય તં પુનઃ પ્રોચુર્હર્ષગદ્ગદયા ગિરા ॥ ૩૩॥

દેવા ઊચુઃ ।
તવ પાદેઽચલાં ભક્તિં દેહિ વિઘ્નેશ નઃ પરામ્ ।
યયા વિઘ્નવિહીનાશ્ચ શાન્તિં પ્રાપ્તાઃ સુયોગિનઃ ॥ ૩૪॥

મમાસુરં નાથ જહિ સર્વપીડાપ્રદાયકમ્ ।
ધર્મધ્વંસકરં પૂર્ણં વર્ણસઙ્કરકારિણમ્ ॥ ૩૫॥

કારાગારે વયં ક્ષિપ્તા વરદાનપ્રભાવતઃ ।
અધુનોપોષણૈર્યુક્તાઃ કૃતાસ્તેનાસુરેણ ચ ॥ ૩૬॥

એવં તેષાં વચઃ શ્રુત્વા વિઘ્નરાજઃ પ્રતાપવાન્ ।
તથેતિ તાનુવાચેદં કરિષ્યામિ વચો હિતમ્ ॥ ૩૭॥

એતસ્મિન્નન્તરે દેવિ તત્ર ચિત્રં બભૂવ હ ।
દૈત્યાઃ સંસ્થાપિતાઃ પૂર્વં રક્ષાર્થં યે દિવૌકસામ્ ॥ ૩૮॥

તે દૃષ્ટ્વા ચેષ્ટિતં તેષાં ગણેશાઽઽગમનાત્મકમ્ ।
ગત્વા તં સર્વવૃત્તાન્તં કથયામાસુરાદરાત્ ॥ ૩૯॥

રક્ષકા ઊચુઃ ।

દેવૈઃ સંરાધિતસ્તત્રાઽઽયયૌ વિઘ્નપતિઃ પ્રભો ।
તં પ્રણમ્ય મહેશાદ્યાસ્તુષ્ટુવુસ્તદ્વધાય ચ ॥ ૪૦॥

તથેતિ ગણનાથેન કૃતં સર્વં ન સંશયઃ ।
અધુના દૈત્યનાથ ત્વં યત્ કરિષ્યસિ તત્ કુરુ ॥ ૪૧॥

તેષાં વચનમાકર્ણ્ય ક્રોધયુક્તો મમાસુરઃ ।
સર્વાનાનાય્ય વૃત્તાન્તં કથયામાસ વિસ્તરાત્ ॥ ૪૨॥

શ્રુત્વા તે ભયસંયુક્તા બભૂવુર્જાતસમ્ભ્રમાઃ ।
જગુસ્તં પ્રણિપત્યૈવ વચનં સ્વહિતાવહમ્ ॥ ૪૩॥

દૈત્યેન્દ્રા ઊચુઃ ।
કારાગારે સ્થિતા દેવાસ્તૈઃ કથં ગણનાયકઃ ।
(Page ખં. ૭ અ. ૭ પાન ૧૪)
આરાધિતો વિશેષેણ વરદશ્ચ બભૂવ હ ॥ ૪૪॥

દૈત્યૈર્દૃષ્ટસ્તત્ત્વમયો ગણાધીશો ન સંશયઃ ।
તત્ત્વહીનો ન દૈત્યેન્દ્ર દૃશ્યતે કેનચિત્ કદા ॥ ૪૫॥

અતઃ સદેવકં તં તુ હનિષ્યામો ન સંશયઃ ।
કિં કરિષ્યતિ વિઘ્નેશસ્ત્વાં ધ્રુવં મૃત્યુવર્જિતમ્ ॥ ૪૬॥

એવમુક્ત્વા મહાદૈત્યાશ્ચક્રુર્નાદં ભયઙ્કરમ્ ।
દેવાદીનાં તતઃ સર્વે સન્નદ્ધાઃ પ્રબભૂવિરે ॥ ૪૭॥

એતસ્મિન્નન્તરે તત્ર પુનશ્ચિત્રં બભૂવ હ ।
નારદો વિઘ્નરાજં તં યયૌ હર્ષસમન્વિતઃ ॥ ૪૮॥

પ્રણમ્યાસ્તુત્ય વિઘ્નેશં ગાનં ચકાર હર્ષતઃ ।
જગાદ તં મહાયોગી પ્રભો જહિ મમાસુરમ્ ॥ ૪૯॥

મુનિં તં વિઘ્નરાજસ્તુ સામાર્થં દૈત્યપસ્ય વૈ ।
સમીપે પ્રેષયામાસ સ યયૌ દૈત્યનાયકમ્ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે વિઘ્નરાજપ્રાદુર્ભાવો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૭.૬

## ૭.૭ મમાસુરગર્વહરણં નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।
સમાગતં મમો દૈત્યો નારદં પૂજ્ય દૈત્યપૈઃ ।
પ્રષ્ટું સમુદ્યતો યાવત્તાવત્તં નારદોઽબ્રવીત્ ॥ ૧॥

નારદ ઉવાચ ।
આપદ્ધર્મવિવેકેન દેવૈઃ સંરાધિતોઽધુના ।
ગણેશો વરદો ભાતિ દેવેભ્યઃ સિદ્ધિદાયકઃ ॥ ૨॥

ત્વદ્વધાર્થં મહારાજ પ્રાર્થિતો દેવનાયકૈઃ ।
તથેતિ પ્રતિપાદ્યૈવ તત્ર સંસ્થોઽધુના પ્રભુઃ ॥ ૩॥

સામાર્થં પ્રેષયામાસ માં મમ તેઽત્ર સન્નિધૌ ।
શ◌ૃણુ વાક્યં મદીયં ત્વં હિતં તેન ભવિષ્યતિ ॥ ૪॥

વિઘ્નાઃ સત્તાત્મકાઃ પ્રોક્તાઃ સત્તાઽત્ર ત્રિવિધા મતા ।
સત્યસઙ્કલ્પરૂપા ચ પરાધીનાત્મિકા પ્રભો ॥ ૫॥

સત્યસઙ્કલ્પસત્તાયા ધારકા બ્રહ્મવાચકાઃ ।
પરમેશ્વરસંજ્ઞાસ્તે સ્વાધીનાઃ પ્રભવન્તિ યે ॥ ૬॥

અન્યે નરાદયઃ પ્રોક્તાઃ સત્તાવન્તો ન સંશયઃ ।
તેષુ દૈવં સમાખ્યાતં દૈવાધીનાસ્તતઃ સ્મૃતાઃ ॥ ૭॥

ત્વં વરેણ સમર્થોઽસિ સ્વસત્તાસંયુતો ન ચ ।
વરસત્તાત્મકો દૈત્ય પરાધીનો ન સંશયઃ ॥ ૮॥

પરાધીના નરા વિઘ્નૈઃ પીડિતાઃ સર્વદા મતાઃ ।
વૃથા ગર્વયુતા અન્તે સત્તાહીના ભવન્ત્યુત ॥ ૯॥

અહં બ્રહ્મેતિ મોહેન મોહિતા જગદીશ્વરાઃ ।
મદાધારમિદં સર્વં વિશ્વં ચલતિ તેઽબ્રુવન્ ॥ ૧૦॥

અસ્મભ્યો ન પરં કિઞ્ચિત્ સત્તાહીનાસ્તદાઽભવન્ ।
સત્યસઙ્કલ્પજાં તેષાં સિદ્ધિં ગૃહ્ણાતિ વિઘ્નપઃ ॥ ૧૧॥

અતો વિઘ્નયુતં સર્વં જાનીહિ દ્વિવિધં મતમ્ ।
સત્યાસત્યમયં દૈત્ય દ્વન્દ્વમાયાવિમોહિતમ્ ॥ ૧૨॥

આનન્દં પરમં બ્રહ્મ દ્વન્દ્વહીનં સમાત્મકમ્ ।
દ્વન્દ્વેષુ દ્વન્દ્વભાવાખ્યં પરં તન્મોહવર્જિતમ્ ॥ ૧૩॥

તદેવ વિઘ્નરાજાખ્યં બ્રહ્મ વેદૈઃ પ્રકાશિતમ્ ।
દેવૈરારાધિતં પૂર્ણં દેહધારિ બભૂવ હ ॥ ૧૪॥

(Page ખં. ૭ અ. ૭ પાન ૧૫)
અધુના તત્ સમાયાતં દેવાગારેષુ દૈત્યપ ।
તદ્ગચ્છ શરણં નો ચેન્ મરિષ્યસિ ન સંશયઃ ॥ ૧૫॥

સ્વસ્વધર્મયુતં સર્વં વિશ્વં ભવતુ દૈત્યપ ।
સ્વધર્મનિરતો ભૂત્વા તિષ્ઠ સ્થાને સ્વકે સદા ॥ ૧૬॥

સ્વર્ગભોગકરા દેવા નરા ભૂમિસમાશ્રિતાઃ ।
દૈત્યાઃ પાતાલગા ભૂત્વા તિષ્ઠન્તુ સુખસંયુતાઃ ॥ ૧૭॥

વર્ણાશ્રમયુતા લોકાસ્તિષ્ઠન્તુ નિત્યમાદરાત્ ।
એવં કૃત્વા મમ ત્વં તુ તિષ્ઠ વૈ ભોગસંયુતઃ ॥ ૧૮॥

એતસ્મિન્નન્તરે તત્ર વાગ્બભૂવાશરીરિણી ।
મા ગર્વં કુરુ દૈત્યેન્દ્ર નારદાજ્ઞાવશો ભવ ॥ ૧૯॥

નોચેદ્વિઘ્નપતિઃ ક્રુદ્ધસ્ત્વાં હનિષ્યતિ નિશ્ચિતમ્ ।
અતસ્તં શરણં ગચ્છ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૦॥

મમાસુરશ્ચ તાં શ્રુત્વા ખેદયુક્તો બભૂવ હ ।
શુક્રં તત્ર સમાનાય્ય વિચારમકરોત્ પરમ્ ॥ ૨૧॥

શુક્રેણાઽપિ તથા પ્રોક્તં તતઃ સ ભયસંયુતઃ ।
પ્રણમ્ય નારદં વાક્યં જગાદ હિતમાત્મનઃ ॥ ૨૨॥

મમાસુર ઉવાચ ।
ત્વયા નારદ યત્ પ્રોક્તં તથા શુક્રેણ નિશ્ચિતમ્ ।
દેવાનાં હિતમત્યન્તં નાઽહં યામિ ગજાનનમ્ ॥ ૨૩॥

આદૌ મયા વિશેષેણ સેવિતોઽયં મહામુને ।
માં ત્યક્ત્વા દેવનાથઃ સોઽભવત્તેન નયામિ તમ્ ॥ ૨૪॥

મરણં મે યદા પ્રાપ્તં ભવિષ્યતિ યશસ્કરમ્ ।

શત્રૂણાં શરણં વિપ્ર ન યોગ્યં માનિનાં કદા ॥ ૨૫॥

તસ્ય તદ્વચનં શ્રુત્વા નારદઃ પુનરબ્રવીત્ ।
મા ચિન્તાં કુરુ દૈત્યેન્દ્ર નાયં દેવસહાયવાન્ ॥ ૨૬॥

દેવા મદયુતા જાતા દૈત્યાન્ જઘ્નુઃ પ્રમોહિતાઃ ।
દૈત્યાનાં મૂલનાશાર્થં પાતાલં વિવિશુઃ પુરા ॥ ૨૭॥

તદાઽયં વરદો ભૂત્વા તવ સામર્થ્યતઃ સ્વયમ્ ।
દેવાન્ મદવિહીનાંશ્ચ ચકાર વિઘ્નનાયકઃ ॥ ૨૮॥

અપિ ત્વં મોહસંયુક્તસ્ત્યક્ત્વા ગણપતિં પરમ્ ।
કર્મનાશનતઃ સર્વાન્ દેવાન્ હન્તું સમુદ્યતઃ ॥ ૨૯॥

કર્મનાશપ્રભાવેણ દેવા નષ્ટા ભવન્તિ ચ ।
નિર્દેવં વિશ્વમત્યન્તં તદા ભવતિ સર્વદા ॥ ૩૦॥

અતસ્ત્વાં હન્તુમુદ્યુક્તો વિઘ્નરાજો મહાસુર ।
સ્વસ્વધર્મયુતાંશ્ચેત્તાન્ન હન્તિ બ્રહ્મનાયકઃ ॥ ૩૧॥

સુરાસુરમયશ્ચાયં સિદ્ધિબુદ્ધિવિહારકૃત્ ।
સિદ્ધિબુદ્ધિવિહીનસ્ત્વં કિં કરિષ્યસિ તદ્વદ ॥ ૩૨॥

વિઘ્નરાજસ્ય વિઘ્નં તુ કઃ ક્ષમો જાયતે વદ ।
કર્તું વિઘ્નયુતો નિત્યં મૂર્ખભાવાન્ મરિષ્યસિ ॥ ૩૩॥

આનન્દં બ્રહ્મ વેદેષુ કથિતં સદસન્મયમ્ ।
ન તત્ત્વસંયુતં દૈત્ય તત્ત્વહીનં ન વિદ્યતે ॥ ૩૪॥

સર્વત્ર યોગભાવેન સંસ્થિતં દ્વન્દ્વધારકમ્ ।
સ એવ વિઘ્નરાજસ્ત્વાં હનિષ્યતિ ન સંશયઃ ॥ ૩૫॥

તેનૈવ ત્રિવિધં સર્વં રચિતં યોગમાયયા ।
સ્વસ્વધર્મયુતં વિશ્વં કૃતં ક્રીડાર્થમઞ્જસા ॥ ૩૬॥

યદા ગર્વયુતા દૈત્ય જન્તવશ્ચેશ્વરાદયઃ ।
ત્યક્ત્વા સ્વધર્મં મોહેન સંસક્તા વિષયેઽભવન્ ॥ ૩૭॥

સર્વૈરવધ્યતાં પ્રાપ્ય કુર્વન્તિ મનસીપ્સિતમ્ ।
તદાઽયં દેહધારી સમ્ભવતે મદનાશકઃ ॥ ૩૮॥

અસન્મયો ગણેશસ્ય દેહઃ સન્મયમસ્તકમ્ ।
તેનાઽયં ગજવક્ત્રોઽભૂત્તં ગચ્છ શરણં પરમ્ ॥ ૩૯॥

નારદસ્ય વચઃ શ્રુત્વા તથા કાવ્યસ્ય દૈત્યપઃ ।
મમાસુરઃ ખવાણીં તાં વિચારમકરોત્ હૃદિ ॥ ૪૦॥

(Page  ખં. ૭ અ. ૭ પાન ૧૬)
ગણેશો બ્રહ્મરૂપોઽયં સ્વાનન્દે વાસકારકઃ ।
ગચ્છામિ શરણં તં સ્વહિતં તેન ભવિષ્યતિ ॥ ૪૧॥

વિઘ્નરાજમનાદૃત્ય સિદ્ધિબુદ્ધિપતિં પ્રભુમ્ ।
કો વિઘ્નહીનતાં પ્રાપ્ય તિષ્ઠેદ્વૈ સર્વમણ્ડલે ॥ ૪૨॥

સ્વયં દૈત્યાનુવાચાથ વચનં હિતકારકમ્ ।
મમાસુરઃ પ્રસન્નાત્મા ગણેશો મમતાં દધૌ ॥ ૪૩॥

મમાસુર ઉવાચ ।
દૈત્યેન્દ્રાઃ કાલમુખ્યા મે વચનં શ‍ૃણુત પ્રિયાઃ ।
કાવ્યેન નારદેનોક્તં ખવાણ્યા તત્ કરોમ્યહમ્ ॥ ૪૪॥

તસ્ય તદ્વચનં શ્રુત્વા ધર્માધર્મૌ સમૂચતુઃ ।
ન દેવપક્ષિણં યોગ્યં શરણં જગદીશ્વરમ્ ॥ ૪૫॥

મરણં રણમધ્યે તુ સ્વર્ગદં કીર્તિદં ભવેત્ ।
તસ્માદ્યુધ્યામહે તાત વિઘ્નેશેન વિશેષતઃ ॥ ૪૬॥

દેહધારી ગણેશાનઃ કિં કરિષ્યતિ માં વદ ।
તાત તે માયયા દેવા દર્શયન્તિ પ્રમોહકમ્ ॥ ૪૭॥

નારદો ગણરાજસ્ય ભક્તસ્તસ્ય વચઃ કથમ્ ।
દૈત્યેન્દ્રૈઃ સહ માન્યં ત્વં કરિષ્યસિ મહામતે ॥ ૪૮॥

નારદભાવરક્ષાર્થં કાવ્યો વદતિ વૈ તથા ।
દેવૈઃ સંરચિતા વાણી ખસ્થા તસ્યા વચો વૃથા ॥ ૪૯॥

મા કુરુષ્વ ભયં તાત તત્ત્વયુક્તં ગજાનનમ્ ।
હનિષ્યામઃ પ્રતાપેન તવ દૈત્યપ્રપાલક ॥ ૫૦॥

એવમુક્ત્વા મહાવીરૌ રથારૂઢૌ બભૂવતુઃ ।
દેવાન્ હન્તું પ્રગર્વેણ જગ્મતુઃ ક્રોધસંયુતૌ ॥ ૫૧॥

મામેતિ વચનં દૈત્યનાથસ્ય ત્યજ્ય દુર્મદૌ ।
ધર્માધર્મૌ ગણેશાનં જગ્મતુર્હનનાય ચ ॥ ૫૨॥

તતો ગણેશ્વરં વિપ્રો નારદઃ પ્રજગામ હ ।
કથયામાસ વૃત્તાન્તં સોઽપિ ક્રોધયુતોઽભવત્ ॥ ૫૩॥

દેવાન્ ભયયુતાન્ વીક્ષ્ય જગાદ ગણનાયકઃ ।
મા ભયં કુરુત પ્રાજ્ઞા હનિષ્યામિ મમાસુરાન્ ॥ ૫૪॥

અમોઘાસ્ત્રબલૈર્યુક્તો મમાસુરઃ પ્રતાપવાન્ ।
સમાગતઃ સોઽપિ ચેત્તં હનિષ્યામિ ન સંશયઃ ॥ ૫૫॥

એવમુક્ત્વા ગણાધીશઃ કમલં નિજહસ્તગમ્ ।
મુમોચ ક્રોધસંયુક્તો મહાસ્ત્રં બ્રહ્મરૂપકમ્ ॥ ૫૬॥

ક્ષણેન કમલં તત્ર દૈત્યસૈન્યે પપાત હ ।
તસ્માજ્જાતઃ સુવાસશ્ચ પ્રસસાર મહીતલે ॥ ૫૭॥

ગણેશાનં દ્વિષન્તસ્તાન્ જઘાન વાસ આગતઃ ।
દ્વેષહીનાન્ સમુત્સૃજ્ય તદદ્ભુતમિવાઽભવત્ ॥ ૫૮॥

વાસં ગૃહ્ય મહાદૈત્યૌ ધર્માધર્મૌ મૃતૌ મૃધે ।
પ્રધાનાઃ પઞ્ચ તદ્વત્તે મૃતાસ્તત્ર બભૂવિરે ॥ ૫૯॥

તતો હાહારવં કૃત્વા દૈત્યાઃ પાતાલમાવિશન્ ।
કમલં ક્રોધસંયુક્તં જગામ હ મમાસુરમ્ ॥ ૬૦॥

સુવાસકં તસ્ય ગૃહ્ય મૂર્ચ્છિતોઽભૂન્ મમાસુરઃ ।
પ્રહરાર્ધેન દૈત્યેશઃ સાવધાનો બભૂવ હ ॥ ૬૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે મમાસુરગર્વહરણં નામ સપ્તમોઽધ્યાયઃ ॥ ૭.૭
(Page ખં. ૭ અ. ૮ પાન ૧૭)

## ૭.૮ મમાસુરશાન્તિવર્ણનં નામાષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।
તતો મમાસુરસ્તત્ર સાવધાનો બભૂવ હ ।

સમીપે કમલં સંસ્થં દૃષ્ટ્વા ભયયુતોઽભવત્ ॥ ૧॥

ત્યક્ત્વા ગર્વં મહાદૈત્યઃ કમલં પ્રણનામ હ ।
કૃત્વા કરપુટં ભીતોઽભવત્ સ્તોતું સમુદ્યતઃ ॥ ૨॥

મમાસુર ઉવાચ ।
કમલાય નમસ્તુભ્યં ગણેશશસ્ત્રમુખ્યક ।
વાસનાનાં પરેશાય સુવાસધારિણે નમઃ ॥ ૩॥

વિષયેષુ સુવાસેન મોહિતાઃ સમ્ભ્રમન્તિ તે ।
સંસારે દુઃખસંયુક્તાઃ સુખયુક્તાઃ ત્વયા કૃતાઃ ॥ ૪॥

યોગવાસનયા યુક્તા બ્રહ્મભૂતા ભવન્તિ તે ।
વાસનાનાં પ્રભેદાશ્ચ બહવસ્તેષુ કિં બ્રુવે ॥ ૫॥

તેષાં બ્રહ્મસ્વરૂપાય ખેલકાય નમો નમઃ ।
વિશ્વં કમલસમ્ભૂતં પદ્માકારં વદન્તિ તત્ ॥ ૬॥

અતસ્ત્વાં કઃ સમર્થઃ સ્યાત્ સ્તોતું શસ્ત્રોત્તમોત્તમ ।
નમો નમઃ પ્રસન્ન ત્વં ભવ માં રક્ષ તે ભયાત્ ॥ ૭॥

દૈત્યેશં સંસ્તુવન્તં તં દૃષ્ટ્વા શાન્તિં સમાદધે ।
કમલં ગણરાજસ્ય હસ્તગં પ્રબભૂવ હ ॥ ૮॥

મમાસુરઃ પ્રસન્નાત્મા કાવ્યેન વિઘ્નનાયકમ્ ।
જગામ તં પ્રણમ્યૈવ પુપૂજે ભક્તિસંયુતઃ ॥ ૯॥

પુનઃ પ્રણમ્ય વિઘ્નેશં કૃત્વા કરપુટં પ્રિયે ।
તુષ્ટાવ હર્ષસંયુક્તો જ્ઞાત્વા તં બ્રહ્મનાયકમ્ ॥ ૧૦॥

મમાસુર ઉવાચ ।
વિઘ્નેશાય નમસ્તુભ્યં સર્વસત્તાપ્રચાલિને ।
અનાદયે પરેશાય બ્રહ્મેશાય નમો નમઃ ॥ ૧૧॥

ગણેશાય ગણાનાં તુ ચાલકાય પરાત્મને ।
આનન્દાય સદાનન્દદાયકાય નમો નમઃ ॥ ૧૨॥

હેરમ્બાયૈકદન્તાય શૂર્પકર્ણાય ઢુણ્ઢયે ।
લમ્બોદરાય વૈ તુભ્યં ભક્તપાલ નમો નમઃ ॥ ૧૩॥

સ્વાનન્દપતયે તુભ્યં યોગાકારસ્વરૂપિણે ।

શાન્તિભ્યઃ શાન્તિદાત્રે તે શાન્તિસ્થાય નમો નમઃ ॥ ૧૪॥

જ્યેષ્ઠરાજાય પૂજ્યાય સર્વેષાં સર્વનાયક ।
વિનાયકાય દેવાનાં દૈત્યાનાં પાલકાય તે ॥ ૧૫॥

આદિપૂજ્યાય ચાન્તે તે અવશિષ્ટાય તે નમઃ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં ચતુર્ભુજ નમો નમઃ ॥ ૧૬॥

શેષસ્યોપરિસંસ્થાય નાગેશધ્વજધારિણે ।
ગજાનનાય દેવેશ નમો દૈત્યેશરૂપિણે ॥ ૧૭॥

ભક્તાનાં વિઘ્નહન્ત્રે તે હ્યભક્તાનાં વિનાશિને ।
યોગિનાં સમભાવાય હૃદિસ્થાય નમો નમઃ ॥ ૧૮॥

નાનાભેદમયં બ્રહ્માસદ્રૂપં વેદવાદતઃ ।
ભેદહીનં ચ સદ્રૂપં તયોઃ સામ્યે ત્વમઞ્જસા ॥ ૧૯॥

સમસ્વાનન્દસંસ્થો યઃ કો જાનાતિ ચ તં પ્રભુમ્ ।
વિઘ્નરાજં પ્રપશ્યામિ પ્રત્યક્ષં બ્રહ્મનાયકમ્ ॥ ૨૦॥

તેનાઽહં કૃતકૃત્યશ્ચાઽધુના જાતો ન સંશયઃ ।
ધન્યં મે જન્મ કર્માદિ યેન દૃષ્ટો ગજાનનઃ ॥ ૨૧॥

કિં સ્તૌમિ ત્વાં ગણેશાન યત્ર વેદાદયઃ પ્રભો ।
શાન્તિં પ્રાપ્તા વિશેષેણ યોગિનસ્તે નમો નમઃ ॥ ૨૨॥

એવં મમાસુરઃ સ્તુત્વા નનર્તાસૌ સુભાગ્યવાન્ ।
રોમાઞ્ચિતશરીરશ્ચ સાશ્રુનેત્રઃ સુરૂપિણિ ॥ ૨૩॥

તમુવાચ મહાભક્ત્યા યુતં વિઘ્નપ્રનાયકઃ ।
વરં બ્રૂહિ મહાબાહો દાસ્યામિ સ્તોત્રતોષિતઃ ॥ ૨૪॥

ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
સકામેભ્યો વિશેષેણ નાનાકામપ્રદાયકમ્ ॥ ૨૫॥

નિષ્કામેભ્યો મહામોક્ષદાયકં પ્રભવિષ્યતિ ।
(Page ખં. ૭ અ. ૯ પાન ૧૮)
મમ ભક્તિપ્રદં ચૈતન્ મમ ભાવહરં સદા ॥ ૨૬॥

વિઘ્નેશવચનં શ્રુત્વા તં પ્રણમ્ય મમાસુરઃ ।
જગાદ ભક્તિસંયુક્તો વિઘ્નરાજં કૃતાઞ્જલિઃ ॥ ૨૭॥

મમાસુર ઉવાચ ।
યદિ પ્રસન્નભાવેન વરં દાસ્યસિ વિઘ્નપ ।
તવ ભક્તિં સ્થિરાં દેહિ માયાનાશકરીં પ્રભો ॥ ૨૮॥

ગાણપત્યસહાવાસં દેહિ નાથ નિરન્તરમ્ ।
સ્થાનં ભક્ષ્યાદિકં ઢુણ્ઢે તત્ર સ્થાસ્યામિ યન્ત્રિતઃ ॥ ૨૯॥

દાસોઽહં તે ગણાધીશ નાન્યં યાચે વરં પરમ્ ।
તવ દર્શનમાત્રેણ જ્ઞાનયુક્તોઽહમઞ્જસા ॥ ૩૦॥

વિઘ્નેશ ઉવાચ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મમાસુર ।
ગાણપત્યપ્રિયત્વં ચ યોગયુક્તો ભવિષ્યસિ ॥ ૩૧॥

સ્વસ્થાને નિર્ભયો ભૂત્વા તિષ્ઠ ત્વં મત્પરાયણઃ ।
સ્વધર્મવિધિહીનં ત્વં કર્મ ભુઙ્ક્ષ્વ જનૈઃ કૃતમ્ ॥ ૩૨॥

યત્રાદૌ પૂજનં મે ન સ્મરણં વા મમાસુર ।
મમ ભાવેન સમ્મોહ્ય રાજ્યં કુરુ હૃદિ સ્થિતઃ ॥ ૩૩॥

મદ્ભક્તાન્ દાસવન્નિત્યં રક્ષસ્વ સ્નેહભાવતઃ ।
મમ ભાવવિહીનાંશ્ચ કુરુ મે મમતાયુતાન્ ॥ ૩૪॥

એવં વિઘ્નેશ્વરસ્યૈવ શ્રુત્વા વચનમુત્તમમ્ ।
મમાસુરસ્તં તથેતિ પ્રહૃષ્ટો વાક્યમબ્રવીત્ ॥ ૩૫॥

પ્રણમ્ય તં મમો દૈત્યઃ સ્વસ્થાને પ્રજગામ હ ।
શાન્તિં ધૃત્વા ગણેશાનં ભજતે સર્વભાવતઃ ॥ ૩૬॥

દૈત્યાસ્તં ત્યજ્ય સર્વે તુ ભયયુક્તા વિશેષતઃ ।
પાતાલં વિવિશુઃ સદ્યઃ સોઽપિ હર્ષયુતોઽભવત્ ॥ ૩૭॥

એવં મમાસુરં શાન્તં ચકાર વિઘ્નનાયકઃ ।
સ્વાધીનં કૃત્ય તં સ્થાને સ્થાપયામાસ માનિનિ ॥ ૩૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે મમાસુરશાન્તિવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૭.૮

## ૭.૯ ક્ષેત્રવર્ણનં નામ નવમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।
મમાસુરં શાન્તિયુતં વીક્ષ્ય દેવાઃ સુહર્ષિતાઃ ।
પ્રણમ્ય મુનિસંયુક્તાઃ પુપૂજુર્વિઘ્નનાયકમ્ ॥ ૧॥

પૂજ્ય તં હૃષ્ટરોમાણઃ પુનઃ પ્રણમ્ય ભાવતઃ ।
તુષ્ટુવુર્વિઘ્નરાજં તે બદ્ધાઞ્જલય આદરાત્ ॥ ૨॥

દેવર્ષય ઊચુઃ ।
સામ્યસ્વરૂપં દ્વિવિધેષુ સંસ્થં દ્વન્દ્વૈર્વિહીનં પરમાર્થભૂતમ્ ।
આનન્દનાથં નિજભક્તપોષં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૩॥

સર્વાત્મકં બિમ્બમથો વિધાય તેનૈવ દ્વન્દ્વં રચિતં ગણેશ ।
સત્યસ્વરૂપં ચ પરં હ્યસત્યં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૪॥

ભેદૈર્વિહીનં પરમપ્રમેયં સાક્ષિમયં કૃત્ય વિનાયકત્વમ્ ।
તત્રૈવ નિત્યં સમભાવસંસ્થસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૫॥

ઢુણ્ઢે ત્વયા ભેદયુતં દ્વિતીયં સૃષ્ટં પરં બ્રહ્મ વિહારદં ચ ।
(Page ખં. ૭ અ. ૯ પાન ૧૯)
ઉત્થાનરૂપં ત્વમપિ પ્રસંસ્થસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૬॥

ત્વન્માયયા મોહયુતે પરેશે અન્યોન્યમાદૌ મિલિતે પ્રકાશિન્ ।
તત્ર સ્થિતસ્ત્વં ચ વિમોહશૂન્યસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૭॥

ત્વત્પ્રેરિતં દ્વન્દ્વમયં પરં ચ સોઽહં તથા બિન્દુમયં ચકાર ।
તત્સ્થઃ સમત્વેન વિહારકારિંસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૮॥

તાભ્યાં મિલિત્વા રચિતં ગણેશ વિશ્વં ચતુષ્પાદમયં પુરાણમ્ ।
તત્રૈવ તે નાથ પ્રકાશભાવસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૯॥

એવં સ્વતોત્થાનબલેન કૃત્વા સામ્યસ્વરૂપેણ વિહારકારિન્ ।
તદ્ભાવશૂન્યોઽસિ ગજાનન ત્વં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૦॥

એવં પરેશાધિપતેન સૃષ્ટં ત્વં તાદૃશો નો ગણરાજ ભાસિ ।
સાઙ્ખ્યસ્વરૂપં પ્રવદન્તિ વેદાસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૧॥

દોષૈર્વિહીનં પ્રવદન્તિ સાઙ્ખ્યં તસ્માન્ન વિઘ્નેશ્વર સાઙ્ખ્યસંસ્થઃ ।

ઉત્થાનહીનો ન ભવેઃ કદાપિ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૨॥

સ્વાનન્દવાસી ગણનાયકસ્ત્વમાનન્દરૂપોઽસિ વદન્તિ વેદાઃ ।
દ્વન્દ્વપ્રકાશશ્ચ તદાત્મશૂન્યઃ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૩॥

નિત્યં મનોવાક્પ્રભવૈશ્ચ હીનઃ સામ્યાત્મકેનૈવ સુયોગકેન ।
લક્ષ્યઃ સદાનન્દઘનપ્રકાશસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૪॥

સ્તોતું ન શક્તાઃ પ્રભવન્તિ વેદા હેરમ્બમાદ્યં પ્રણમામહે ત્વામ્ ।
તેનૈવ તુષ્ટો ભવ દેવદેવ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૫॥

સર્વાત્મકં ત્વાં પ્રવદન્તિ સર્વે યોગીન્દ્રમુખ્યાઃ પ્રભુદાસભૂતાઃ ।
તત્રૈવ તે ધ્યાનમપારમેવં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૬॥

તેષાં મનોભક્તિભવં ચ ભાવં સંરક્ષણાર્થં વપુષા પ્રયુક્તઃ ।
તત્રૈવ ભક્તિં કુરુતે સુભક્તસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૭॥

દેહસ્ત્વસદ્બ્રહ્મમયશ્ચ તેઽયં સદ્રૂપતુણ્ડં ગજવાચકં તે ।
યોગે તયોસ્ત્વં ચ વિભાસિ દેવસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૮॥

કર્યાનનં ત્વાં પ્રવદન્તિ તેન સન્તઃ સદા યોગમયં હૃદિસ્થમ્ ।
સિદ્ધિપ્રદં બુદ્ધિપ્રચાલકં વૈ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૧૯॥

બ્રહ્માઽહમેવં મદધીનકં ચ વિશ્વાદિકં બ્રહ્મગણા વદન્તિ ।
ત્વન્માયયા મોહિતચેતસસ્તે તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૨૦॥

સત્તાવિહીનાન્ પ્રકરોષિ તાંસ્ત્વં વિઘ્નપ્રદાનેન મહાનુભાવ ।
સ્વાર્થૈર્વિહીનાઃ પ્રભવન્તિ પૂર્ણાસ્તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૨૧॥

અઙ્ઘ્રિં પુનસ્તે શરણાશ્રિતાસ્તે વિઘ્નેન હીનાઃ પ્રભવો ભવન્તિ ।
વિઘ્નેશનામાઽસિ તતસ્ત્વમેવ તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૨૨॥

એતાદૃશં વિઘ્નપતિં કથં વૈ સ્તોતું વયં યોગમયં ભવામઃ ।
વેદા ન શક્તા મનસા હ્યલભ્યં તં વિઘ્નરાજં સતતં ભજામઃ ॥ ૨૩॥

કશ્યપ ઉવાચ ।
એવં સ્તુત્વા ગણાધીશં પ્રણેમુરમરર્ષયઃ ।
તુષ્ટસ્તાનબ્રવીદ્દેવો વિઘ્નેશો બ્રહ્મણાં પતિઃ ॥ ૨૪॥

વિઘ્નેશ ઉવાચ ।
દેવર્ષયો વરાન્ બ્રૂત મહાભાગા હૃદીપ્સિતાન્ ।

દાસ્યામિ સ્તોત્રતુષ્ટોઽહં ભક્ત્યા સ્વાધીનતાં ગતઃ ॥ ૨૫॥

ભવત્કૃતમિદં સ્તોત્રં ભવેત્ સર્વાર્થદાયકમ્ ।
(Page ખં. ૭ અ. ૯ પાન ૨૦)
યઃ પઠેચ્છૃણુયાદ્વાઽપિ સ સર્વં પ્રાપ્નુયાત્ પરમ્ ॥ ૨૬॥

વિદ્યામાયુર્ધનં ધાન્યં યશો ધર્મં તથાર્થકમ્ ।
કામં મોક્ષં બ્રહ્મભૂયં દાસ્યામિ સ્તોત્રપાઠતઃ ॥ ૨૭॥

પુત્રપૌત્રાદિકં સૌખ્યમારોગ્યાદિસમન્વિતમ્ ।
વિજયં જયકાલે ચ સ્તોત્રપાઠાલ્લભેન્નરઃ ॥ ૨૮॥

મારણોચ્ચાટનાદ્યં ચાનેન સિદ્ધં ભવિષ્યતિ ।
પરકૃત્યપ્રશમનં ભવેચ્ચ મરણાદિકમ્ ॥ ૨૯॥

કારાગૃહાદિજા પીડા નશ્યેદનેન નિશ્ચિતમ્ ।
સહસ્રાવર્તનાદ્દેવા મુનયો નાઽત્ર સંશયઃ ॥ ૩૦॥

એકવિંશતિવારં ચૈકવિંશતિ દિનાનિ ચ ।
પઠેદ્વા શ◌ૃણુયાત્ સોઽપિ મનસીપ્સિતમાપ્નુયાત્ ॥ ૩૧॥

મદ્ભક્તિવર્ધનં ચેદં ભવિષ્યતિ નિરન્તરમ્ ।
અપરાધાદિકસ્યાઽપિ નાશકં ચાસ્તુ સર્વદા ॥ ૩૨॥

એવં ગણપતેર્વાક્યં શ્રુત્વા તમમરર્ષયઃ ।
પ્રણમ્ય દેવમૂચુસ્તે વચનં ભક્તિસંયુતાઃ ॥ ૩૩॥

દેવર્ષય ઊચુઃ ।
યદિ પ્રસન્નતાં યાતો વિઘ્નેશસ્તે પદામ્બુજે ।
ભક્તિં દેહિ વિશેષેણ વરં નાન્યં વૃણીમહે ॥ ૩૪॥

મમાસુરસ્ત્વયા નાથ શાન્તિયુક્તઃ કૃતો મહાન્ ।
તેન સ્વસ્થાનગાઃ સર્વે ભવિષ્યન્તિ દિવૌકસઃ ॥ ૩૫॥

મુનયઃ કર્મકર્તારો જનાઃ સ્વધર્મસંયુતાઃ ।
ભવિષ્યન્તિ ગણાધ્યક્ષ વૃણીમહિ કિમપ્યહો ॥ ૩૬॥

કૃતં ત્વયા વરાણાં યત્ કાર્યં વિઘ્નવિદારણ ।
તથેતિ તાનથોક્ત્વાઽસૌ દેવેશોઽતર્દધે પ્રિયે ॥ ૩૭॥

દેવા મુનિગણૈઃ સાર્ધં તં પ્રણમ્ય વિશેષતઃ ।

ખેદયુક્તા ગણાધ્યક્ષં સ્થાપયામાસુરાદરાત્ ॥ ૩૮॥

હિમાચલસ્ય મધ્યે તત્ સ્થાનં વિઘ્નપતેઃ પરમ્ ।
સમ્પૂર્ણમુત્તરદિશિ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૩૯॥

ભાદ્રશુક્લચતુર્થ્યાં તુ મધ્યાહ્ને સ્થાપિતઃ પરઃ ।
વિઘ્નેશો મુનિભિઃ સાર્ધં દેવૈઃ સર્વસુખાવહઃ ॥ ૪૦॥

મધ્યે વિઘ્નપતિઃ સાક્ષાદ્વામે સિદ્ધિઃ સ્થિતા સ્વયમ્ ।
બુદ્ધિશ્ચ દક્ષિણાઙ્ગે તુ નાગેશઃ પુરતઃ સ્થિતઃ ॥ ૪૧॥

ક્ષેત્રાણિ પૃષ્ઠભાગે ચ પ્રયાગાદીનિ માનદે ।
સંસ્થિતાનિ પ્રસેવાર્થં વિઘ્નરાજસ્ય નિત્યદા ॥ ૪૨॥

વામે શુમ્ભુમુખા દેવા દક્ષિણાઙ્ગે મુનીશ્વરાઃ ।
પુરતો ગણરાજસ્ય સેવન્તે તં સુલોચને ॥ ૪૩॥

અસુરા નાગમુખ્યાશ્ચ ગન્ધર્વાપ્સરસસ્તથા ।
નાનાસિદ્ધગણાસ્તત્ર વસન્તિ સેવનોત્સુકાઃ ॥ ૪૪॥

ગઙ્ગાદ્યાઃ સરિતસ્તત્ર ભક્તિયુક્તા વસન્તિ ચ ।
અન્યે નાના જના દેવિ વસન્તિ ભક્તિકારકાઃ ॥ ૪૫॥

દશયોજનવિસ્તારં ક્ષેત્રસ્ય મુખ્યભાવતઃ ।
ચતુરસ્રં મહાક્ષેત્રં જ્ઞાતવ્યં સ્વસુખપ્રદમ્ ॥ ૪૬॥

તત્ર ગણેશતીર્થં તુ સર્વસિદ્ધિપ્રદાયકમ્ ।
જન્તવે સ્નાનમાત્રેણ ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૪૭॥

અન્યેષાં વિષ્ણુમુખ્યાનાં તત્ર તીર્થાનિ યોગિનામ્ ।
સ્થિતાનિ સ્નાનમાત્રેણ સ્વસ્વસાયુજ્યદાનિ તુ ॥ ૪૮॥

અન્યદેવાદિકાનાં યે ભક્તાઃ ક્ષેત્રે મૃતા યદિ ।
તે સર્વે શુક્લગત્યા ચ બ્રહ્મભૂતા ભવન્તિ વૈ ॥ ૪૯॥

યાત્રાં તત્ર પ્રકુર્વન્તિ ભક્તા ભાદ્રપદે પ્રિયે ।
શુક્લપક્ષે ચતુર્થ્યાં વૈ મહોત્સવપરાયણાઃ ॥ ૫૦॥

ક્ષેત્રવાસિજનાઃ સર્વે દેવર્ષિગણસંયુતાઃ ।
પરસ્પરં વિશેષેણ બોધયન્તિ ગજાનનમ્ ॥ ૫૧॥

(Page ખં. ૭ અ. ૧૦ પાન ૨૧)
વિઘ્નરાજચરિત્રાણિ કથયન્તિ પરસ્પરમ્ ।
સાશ્રુનેત્રા ભવન્ત્યેતે ભક્ત્યા વિઘ્નેશ્વરસ્ય ચ ॥ ૫૨॥

યસ્મિન્ કસ્મિન્ દિને દેવિ યાત્રાં કુર્વન્તિ માનવાઃ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે મુક્તિમવાપ્નુયુઃ ॥ ૫૩॥

યે તત્ર વિઘ્નરાજં તુ નમન્તિ મનસીપ્સિતમ્ ।
લબ્ધ્વા સુખયુતાઃ સર્વે ભવન્તે નાત્ર સંશયઃ ॥ ૫૪॥

યત્ર કુત્ર સ્થિતા દેવિ ભક્તા વિઘ્નેશ્વરસ્ય ચ ।
બ્રહ્મભૂતા ન સન્દેહો દર્શનાત્ પાવના નૃણામ્ ॥ ૫૫॥

માનુષં દેહમાપ્યૈવ ન પશ્યેદ્વિઘ્નનાયકમ્ ।
પશુતુલ્યઃ સ વિજ્ઞેયો જન્મ તસ્ય નિરર્થકમ્ ॥ ૫૬॥

એવં ખણ્ડેષુ સર્વેષુ દ્વીપેષુ ક્ષેત્રમુત્તમમ્ ।
વિઘ્નરાજસ્ય વિપ્રેશૈઃ કૃતમુત્તરદિગ્ભવમ્ ॥ ૫૭॥

બ્રહ્મભૂયપ્રદં ક્ષેત્રં વૈઘ્નેશં ચ ચતુષ્પદમ્ ।
તસ્ય કિં વર્ણનં કુર્યાં યત્ર વેદા વિસિસ્મિરે ॥ ૫૮॥

સઙ્ક્ષેપેણ મયા પ્રોક્તં ક્ષેત્રમાહાત્મ્યમુત્તમમ્ ।
વિસ્તરેણ ન કોઽપ્યેતદ્વર્ણયિતું ક્ષમો ભવેત્ ॥ ૫૯॥

એવં વિઘ્નેશ્વરો દેવો નાનાઽવતારકારકઃ ।
ભક્તાનાં રક્ષણાર્થાયાભક્તાનાં હરણાય ચ ॥ ૬૦॥

અવતારા અસઙ્ખ્યાતા વિઘ્નેશસ્ય મહાત્મનઃ ।
તેષાં ચરિત્રકં વક્તું ન સમર્થોઽહમઞ્જસા ॥ ૬૧॥

ઇદં મમાસુરસ્યૈવ શમનં કથિતં મયા ।
ચરિત્રં વિઘ્નરાજસ્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૬૨॥

શૃણુયાદ્યઃ પઠેદ્વાઽપિ ભયં તસ્ય મમાત્મકમ્ ।
ન ભવેદીપ્સિતં સર્વં લભેદ્બ્રહ્મ સનાતનમ્ ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે મમાસુરશાન્તિયુક્તવિઘ્નેશચરિત-
ક્ષેત્રવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૭.૯

# ૭.૧૦ વિષ્ણ્વવતારવર્ણનં નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દિતિરુવાચ ।
શ્રુત્વા બ્રહ્મપ્રદં પૂર્ણં સર્વસિદ્ધિપ્રદાયકમ્ ।
ચરિતં વિઘ્નરાજસ્ય ન તૃપ્તાઽહં મુનીશ્વર ॥ ૧॥

અહો વિઘ્નપતિઃ સાક્ષાદ્બ્રહ્મભૂતો ન સંશયઃ ।
મયા જ્ઞાતોઽધુના નાથ તવ વાક્યાદ્વિશેષતઃ ॥ ૨॥

અવતારાન્ વદ સ્વામિન્ વિઘ્નેશસ્ય મહાત્મનઃ ।
મુખ્યાનપારકેષુ ત્વં તારયસ્વ ભવાર્ણવાત્ ॥ ૩॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો મહાયોગી કશ્યપો હર્ષસંયુતઃ ।
સમાલિઙ્ગ્ય પ્રિયાં દક્ષ જગાદ વચનં હિતમ્ ॥ ૪॥

ધન્યાઽસિ દક્ષપુત્રિ ત્વં યેન વિઘ્નેશ્વરે રતિઃ ।
જાતા તે સાર્થકં સર્વં કરિષ્યસિ ન સંશયઃ ॥ ૫॥

વિઘ્નેશેન મહાદેવિ સૃષ્ટં બ્રહ્મ હ્યસન્મયમ્ ।
સદ્રૂપં તત્ર બિમ્બેન માયાભ્યાં સંસ્થિતઃ પ્રભુઃ ॥ ૬॥

તતસ્તાભ્યાં મિલિત્વા વૈ સૃષ્ટં ચ દ્વિવિધં પરમ્ ।
સ્વતઃ પરત ઉત્થાનં તતઃ સોઽહં ચ બિન્દુકમ્ ॥ ૭॥

તતશ્ચતુર્વિધં દેવિ વિશ્વં સૃષ્ટં વિશેષતઃ ।
(Page ખં. ૭ અ. ૧૦ પાન ૨૨)
સ્થૂલસૂક્ષ્મસમાત્માખ્યમેકાનેકાદિસંયુતમ્ ॥ ૮॥

એવં નાનાવિધં બ્રહ્મ વિશ્વં નાનાવિધં પુરા ।
આનન્દેન વિહીનત્વાદ્બભૌ વ્યાપારવર્જિતમ્ ॥ ૯॥

સ્વસ્વક્રિયાં પ્રચક્રુર્વૈ ન તત્ર મોહયુક્તતા ।
હીનતા ન તથા તાનિ ખેદયુક્તાનિ સમ્બભુઃ ॥ ૧૦॥

તૈસ્તપો ઘોરરૂપં તુ કૃતં વિઘ્નેશ્વરસ્ય વૈ ।
ધ્યાત્વા બ્રહ્મમયં રૂપમેકાક્ષરવિધાનતઃ ॥ ૧૧॥

દિવ્યવર્ષસહસ્રે તુ ગતે તુ વિઘ્નનાયકઃ ।
હૃદિ તેષાં પ્રસન્નોઽભૂત્ પ્રકટશ્ચ બભૂવ હ ॥ ૧૨॥

નરકુઞ્જરયુક્તં યદ્દર્શયામાસ રૂપકમ્ ।
દૃષ્ટ્વા તં હર્ષિતાનિ બ્રહ્માણિ વૈ નેમુરન્તરે ॥ ૧૩॥

વિઘ્નેશકૃપયા તેષાં તદ્રૂપજ્ઞાનજોઽમલઃ ।
બોધો બભૂવ તેનૈવ તુષ્ટાનિ સ્મ ભજન્તિ તમ્ ॥ ૧૪॥

તતો વિષ્ણુસ્વરૂપેણ વિઘ્નેશો વરદોઽભવત્ ।
આગત્ય તાન્ ઉવાચાથ વરાન્ વૃણુત સર્વપઃ ॥ ૧૫॥

તતો બ્રહ્માણિ તં દૃષ્ટ્વા વિસ્મિતાનિ બભૂવિરે ।
વિઘ્નેશકૃપયા તેષાં જ્ઞાનં તસ્ય બભૂવ હ ॥ ૧૬॥

બિમ્બાત્મકશ્ચ સર્વત્ર વિઘ્નેશોઽયં પ્રતાપવાન્ ।
સ્વમહિમ્નિ સ્થિતઃ સોઽપિ ગજવક્ત્રાદિચિહ્નિતઃ ॥ ૧૭॥

તતો હર્ષયુતાન્યેવં પ્રણેમુર્ભક્તિભાવતઃ ।
નત્વા પૂજ્ય મહાવિષ્ણું તુષ્ટુવુસ્તં સુલોચને ॥ ૧૮॥

બ્રહ્માણ્યૂચુઃ ।
વિઘ્નેશાય નમસ્તુભ્યં ગરુડધ્વજિને નમઃ ।
ચતુર્ભુજાય સર્વેષાં પતયે વૈ નમો નમઃ ॥ ૧૯॥

ચક્રપાણે રમેશાય પરાત્પરતરાય ચ ।
હેરમ્બાય વિકુણ્ઠસ્ય નાથાય તે નમો નમઃ ॥ ૨૦॥

સ્વાનન્દવાસિને તુભ્યં ગજાનનાય ઢુણ્ઢયે ।
અપારાય મહેશાનસુતાય તુ નમો નમઃ ॥ ૨૧॥

કાશ્યપાય ચ શેષસ્ય પુત્રાય ભક્તવત્સલ ।
દૈત્યદાનવનાશાય શાર્ઙ્ગિણે તે નમો નમઃ ॥ ૨૨॥

ગદાધરાય દેવાય વાસુદેવાય દેવપ ।
ધર્મસ્થાપનકારાય બ્રહ્મણે તે નમો નમઃ ॥ ૨૩॥

સદસન્મયરૂપાય ચાનન્દપદધારિણે ।
સમાય સર્વભાવેષુ શાશ્વતાય નમો નમઃ ॥ ૨૪॥

નમો વાગતિરૂપાય દેહદેહિપ્રચારિણે ।

બોધાય ચ વિદેહાય વિષ્ણવે તે નમો નમઃ ॥ ૨૫॥

કિં સ્તુમસ્ત્વાં પરેશાન યત્ર વેદા વિકુણ્ઠિતાઃ ।
યોગિનસ્તુ મહાભાગ પ્રસન્નો ભવ તે નમઃ ॥ ૨૬॥

બ્રહ્માણિ એવં સ્તુત્વા ચ પ્રણેમુસ્તં જનાર્દનમ્ ।
તાન્યુત્થાપ્ય જગાદ સ્વયં વિષ્ણુર્હર્ષસંયુતઃ ॥ ૨૭॥

વિષ્ણુરુવાચ ।
ભવત્કૃતં મદીયં ચ સ્તોત્રં ભુક્તિપ્રદં ભવેત્ ।
મુક્તિદં શ‍ૃણ્વતે બ્રહ્મદાયકં પઠતે સદા ॥ ૨૮॥

બ્રહ્માણિ યદ્યદિચ્છેત તત્તદ્ વૃણુત સત્વરમ્ ।
દાસ્યામિ તપસા તુષ્ટઃ સ્તોત્રેણાનેન નિશ્ચિતમ્ ॥ ૨૯॥

બ્રહ્માણ્યૂચુઃ ।
દેહ્યાનન્દમયં નાથ સૌખ્યં સ્વાભાવિકં પરમ્ ।
સામર્થ્યં સ્વસ્વકાર્યેષુ સત્યસઙ્કલ્પસમ્ભવમ્ ॥ ૩૦॥

તવ પાદયુગે નાથ ભક્તિં દેહિ વિશેષતઃ ।
યોગશાન્તિભવં સૌખ્યં બ્રહ્મભૂયપ્રદાયકમ્ ॥ ૩૧॥

વિષ્ણુરુવાચ ।
ભવદ્ભિઃ પ્રાર્થિતં સર્વં તત્તત્ સર્વં ભવિષ્યતિ ।
સફલં સર્વભાવેન કુરુધ્વં કાર્યમુત્તમમ્ ॥ ૩૨॥

યોગશાન્તિં પ્રવક્ષ્યામિ બ્રહ્મભૂયપ્રદાયિનીમ્ ।
બ્રહ્માણિ ભક્તિયુક્તાનિ શ‍ૃણુધ્વં યોગસેવનાત્ ॥ ૩૩॥

(Page ખં. ૭ અ. ૧૧ પાન ૨૩)
પઞ્ચચિત્તમયીં બુદ્ધિં તત્ર ભ્રાન્તિકરીં પરામ્ ।
સિદ્ધિં જાનીત સર્વત્ર તયોઃ સ્વામી ગજાનનઃ ॥ ૩૪॥

સમ્પ્રજ્ઞાતમયો દેહો સમ્પ્રજ્ઞાતાત્મકં શિરઃ ।
ગજરૂપં તયોર્યોગે દેહધારી બભૂવ હ ॥ ૩૫॥

સંયોગાખ્યો ગકારશ્ચ ણકારો યોગગઃ સ્મૃતઃ ।
તયોર્યોગે ગણેશોઽયં નામાઽભૂન્નાત્ર સંશયઃ ॥ ૩૬॥

સ્વસંવેદ્યેન યોગેન દર્શનં જાયતે પરમ્ ।

ગણેશસ્ય ચ તેનાઽયં સ્મૃતઃ સ્વાનન્દવાસકઃ ॥ ૩૭॥

અસચ્છક્તિશ્ચ સદ્ભાનુઃ સમોહં નેતિ શઙ્કરઃ ।
ચતુર્ણાં બ્રહ્મણાં યોગે સ્વાનન્દઃ કથ્યતે બુધૈઃ ॥ ૩૮॥

સ્વાનન્દો માયયા યુક્તઃ સંયોગાત્ બ્રહ્મણાં મતઃ ।
અયોગો બ્રહ્મણાં માયયા હીનો વ્યતિરેકતઃ ॥ ૩૯॥

સંયોગાઽયોગયોર્યોગે ગણેશઃ શાન્તિરૂપધૃક્ ।
તં ભજધ્વં વિશેષેણ હૃદિ ચિત્તપ્રચાલકમ્ ॥ ૪૦॥

તેન ચ બ્રહ્મભૂતાનિ ભવિષ્યથ ન સંશયઃ ।
બ્રહ્માણિ કથિતં યોગં પ્રયુઙ્ધ્વં ભક્તિકારણાત્ ॥ ૪૧॥

યદ્યચ્ચ ક્રિયતે તત્ત્વૈર્જગદ્રચનકાદિકમ્ ।
ભવદ્ભિસ્તદ્ગણેશાય સમર્પ્ય સકલાઃ ક્રિયાઃ ॥ ૪૨॥

એવમુક્ત્વા મહાવિષ્ણુસ્તત્રૈવાન્તરધીયત ।
બ્રહ્માણિ તં નમસ્કૃત્ય સાધયામાસુરઞ્જસા ॥ ૪૩॥

ક્રમેણ બ્રહ્મભૂતાનિ બ્રહ્માણિ ચ બભૂવિરે ।
તાનિ બ્રહ્માણિ યોગેન ગાણેશે દક્ષનન્દિનિ ॥ ૪૪॥

તત આનન્દયુક્તાનિ ચક્રુઃ સર્વં ચરાચરમ્ ।
તત્રાનન્દેન સર્વાણિ ક્રીડાં ચક્રુઃ પરસ્પરમ્ ॥ ૪૫॥

એતત્તે કથિતં સર્વં ચરિત્રં દેવિ શોભનમ્ ।
વિષ્ણુરૂપધરસ્યાસ્ય વિઘ્નરાજસ્ય સર્વદમ્ ॥ ૪૬॥

શ ૃણુયાદ્યો નરો વાઽપિ પઠેત્તસ્ય પ્રિયે સદા ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં સર્વાનન્દકરં ભવેત્ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે વિષ્ણ્વવતારવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૭.૧૦

## ૭.૧૧ લક્ષ્મીવિનાયકચરિતવર્ણનં નામૈકાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।

એકદા સુખમાસીનં નારાયણમનામયમ્ ।

પ્રણમ્ય તં મહાભાગો વિષ્વક્સેન ઉવાચ હ ॥ ૧॥

વિષ્વક્સેન ઉવાચ ।
વદ કેશવ યોગં મે શાન્તિદં તે પદપ્રદમ્ ।
સંસાધ્ય વિષ્ણુરૂપોઽહં ભવિષ્યામિ સુભક્તિતઃ ॥ ૨॥

શ્રીનારાયણ ઉવાચ ।
નામરૂપાત્મકં સર્વમસત્યં વેદવાદતઃ ।
જન્મમૃત્યુયુતં વિદ્ધિ બ્રહ્મ તત્ર ચ તાદૃશમ્ ॥ ૩॥

સર્વભેદવિહીનં યત્ પરં બ્રહ્માત્મવાચકમ્ ।
અમૃતં સત્યમેકં તજ્જાનીહિ યોગસેવયા ॥ ૪॥

તયોર્યોગે સમં બ્રહ્મ સદાનન્દમયં પરમ્ ।
વિષ્ણુરૂપં સમાખ્યાતં જાનીહિ ભક્તિભાવતઃ ॥ ૫॥

તદેવ વિઘ્નરાજાખ્યં બ્રહ્મ વેદે પ્રતિષ્ઠિતમ્ ।
તં ભજસ્વ વિધાનેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૬॥

(Page ખં. ૭ અ. ૧૧ પાન ૨૪)
વિષ્વક્સેન ઉવાચ ।
કથં વિઘ્નેશ્વરઃ સ્વામિન્ વિષ્ણુરૂપઃ પ્રકીર્તિતઃ ।
વદ માં સર્વશાસ્ત્રજ્ઞ સંશયસ્થાપનુત્તયે ॥ ૭॥

શ્રીવિષ્ણુરુવાચ ।
માયાસુખં વિજાનીહિ વિઘ્નયુક્તં વિશેષતઃ ।
આત્મસૌખ્યં સદા પ્રોક્તં વિઘ્નહીનં બુધૈઃ પુરા ॥ ૮॥

તયોર્યોગે ગણેશાનો વિઘ્નરાજઃ પ્રકીર્તિતઃ ।
સદાનન્દમયઃ સોઽપિ યોગિભિઃ સેવિતોઽભવત્ ॥ ૯॥

ગણઃ સમૂહરૂપશ્ચ સમૂહા બ્રહ્મવાચકાઃ ।
બાહ્યાન્તરાદિયોગેન જ્ઞાયન્તે યોગિભિર્ધ્રુવમ્ ॥ ૧૦॥

ગણેશાનસ્ય બિમ્બં યત્ પતિતં માયયા યુતમ્ ।
તદેવ શિવવિષ્ણ્વાદિ વાચકં પ્રબભૂવ હ ॥ ૧૧॥

અતો ગણેશરૂપા વૈ વયં સર્વે કલાંશતઃ ।
તં ભજસ્વ વિધાનેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૧૨॥

કશ્યપ ઉવાચ ।
વિષ્ણોર્વચનમાકર્ણ્ય વિષ્વક્સેનઃ પ્રણમ્ય તમ્ ।
જગાદ ભક્તિસંયુક્તો વચનં દક્ષ પુત્રિકે ॥ ૧૩॥

વિષ્વક્સેન ઉવાચ ।
નાઽહં ભજામિ વિઘ્નેશં તવ ભક્તિપરાયણઃ ।
ત્વત્તઃ પરતરં નાસ્તિ વદસે કિં જનાર્દન ॥ ૧૪॥

એવમુક્ત્વા સ્વયં વિષ્ણું તં પ્રણમ્ય યયૌ પ્રિયે ।
વનં યોગસ્ય સિદ્ધ્યર્થં તતાપ તપ આદરાત્ ॥ ૧૫॥

આનન્દં સર્વભાવેષુ વિષ્ણું ધૃત્વા સ્વયં હૃદિ ।
જજાપ મન્ત્રરાજં સ ઇદં વિષ્ણુસ્તુ ઋગ્ભવમ્ ॥ ૧૬॥

નિરાહારપરો ભૂત્વા વિષ્વક્સેનઃ પ્રતાપવાન્ ।
તપશ્ચકાર તદ્ભક્ત્યા વૈષ્ણવાનાં શિરોમણિઃ ॥ ૧૭॥

તતો વર્ષશતે પૂર્ણે પ્રસન્નો ગણનાયકઃ ।
દદૌ યોગં સમાખ્યં તુ તસ્મૈ ભાવધરઃ પ્રભુઃ ॥ ૧૮॥

સ્વયં સંયોગરૂપં તં દૃષ્ટ્વા સંહર્ષિતોઽભવત્ ।
તતો હૃદિ ગણેશાનં દદર્શ લક્ષ્મીસંયુતમ્ ॥ ૧૯॥

દૃષ્ટ્વા ખેદસમાયુક્તો વિષ્ણું ચિન્ત્ય મહાયશાઃ ।
મન્ત્રં જજાપ તત્રૈવ ગણેશમવલોકયન્ ॥ ૨૦॥

ક્ષણં નારાયણં લક્ષ્મ્યા યુક્તં દદર્શ ચેતસિ ।
ક્ષણાદ્વિઘ્નેશ્વરં સોઽપિ વિસ્મિતઃ પ્રબભૂવ હ ॥ ૨૧॥

તપસોઽતિપ્રભાવેણ શુદ્ધચિત્તો બભૂવ હ ।
ત્યક્ત્વાભિમાનજં મોહં વિચારમકરોત્ હૃદિ ॥ ૨૨॥

માયામયં શરીરં તુ માયાહીનં ચ મસ્તકમ્ ।
ગજાકારં તયોર્યોગે દેહધારી ગણેશ્વરઃ ॥ ૨૩॥

અસ્ય બિમ્બં સદા મોહયુતં દેવિ વિનિશ્ચિતમ્ ।
વિષ્ણુઃ સમસ્વભાવસ્થો લક્ષ્મ્યાયુક્તો વિશેષતઃ ॥ ૨૪॥

સ્વમહિમ્નિ સ્થિતો દેવઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ।
માયાખેલકરઃ સોઽપિ લક્ષ્મીપતિરુદાહૃતઃ ॥ ૨૫॥

વિષ્ણુના બોધિતોઽહં તુ પૂર્વકાલેઽભિમાનતઃ ।
અબુધ્યં નૈવ તદ્રૂપં વૃથા પણ્ડિતકો યથા ॥ ૨૬॥

અહો યોગસમં કિઞ્ચિન્ન દૃષ્ટં નૈવ સંશ્રુતમ્ ।
યસ્ય સેવનમાત્રેણાભિમાનો નાશમેષ્યતિ ॥ ૨૭॥

એવં વિચાર્ય દેવેશં ગણેશં ધ્યાનસંયુતઃ ।
ધ્યાત્વા પુપૂજ ભાવેન માનસ્યા પૂજયા સ તુ ॥ ૨૮॥

તતઃ પ્રસન્નતાં યાતો ગણેશો ભક્તવત્સલઃ ।
વરાન્ દાતું સમાયાતો વિષ્વક્સેનાશ્રમે પ્રિયે ॥ ૨૯॥

ધ્યાનસ્થો ન બુબોધૈવ સમાગતં ગજાનનમ્ ।
વિષ્વક્સેનસ્તતશ્ચિત્રં ચકાર વિઘ્નનાયકઃ ॥ ૩૦॥

હૃદિસ્થં ગણનાથં સ લોપયામાસ તત્ક્ષણાત્ ।
(Page ખં. ૭ અ. ૧૧ પાન ૨૫)
તતોઽતિવિહ્વલઃ સોઽપિ તં દદર્શ બહિઃ સ્થિતમ્ ॥ ૩૧॥

લક્ષ્મ્યાયુક્તં ગણાધીશં દૃષ્ટ્વા હર્ષસમન્વિતઃ ।
ઉત્થાય તં પ્રણમ્યાઽઽદૌ વિષ્વક્સેનઃ પુપૂજ હ ॥ ૩૨॥

પૂજયિત્વા પુનર્દેહં પ્રણમ્ય સાશ્રુલોચનઃ ।
તુષ્ટાવ ભક્તિસંયુક્તઃ કૃતાઞ્જલિર્ગજાનનમ્ ॥ ૩૩॥

વિષ્વક્સેન ઉવાચ ।
વિઘ્નેશાય નમસ્તુભ્યં ભક્તવિઘ્નવિનાશિને ।
વિઘ્નદાત્રે સુનાથાય હ્યભક્તેભ્યો નમો નમઃ ॥ ૩૪॥

લક્ષ્મીપતે નમસ્તુભ્યં સિદ્ધિબુદ્ધિવરાય ચ ।
સ્વાનન્દવાસિને દેવ વિકુણ્ઠસ્થાય તે નમઃ ॥ ૩૫॥

કેશવાય પરેશાય ચક્રપાણે ગદાધર ।
હેરમ્બાય નમસ્તુભ્યં પરશોર્ધારકાય ચ ॥ ૩૬॥

દશરથસુતાયૈવ વાસુદેવાય તે નમઃ ।
શિવપુત્રાય દેવેશ વરેણ્યસૂનવે નમઃ ॥ ૩૭॥

યોગાકારાય નાથાય યોગાનાં શાન્તિદાયિને ।
કર્ત્રે હર્ત્રે સદા પાત્રે ગણેશાય નમો નમઃ ॥ ૩૮॥

શેષશાયિન્નમસ્તુભ્યં નાભિશેષાય તે નમઃ ।
સર્પયજ્ઞોપવીતાય લમ્બોદરાય શાશ્વતે ॥ ૩૯॥

નાનાખેલકરાયૈવ નાનામાયાપ્રચાલક ।
ખેલહીનાય દેવાનાં સહાયાય નમો નમઃ ॥ ૪૦॥

અસુરાણાં વિનાશાયાસુરભ્યો વરદાયિને ।
ઢુણ્ઢિરાજાય ભક્તેશ ભક્તિપ્રિયાય તે નમઃ ॥ ૪૧॥

ગણેશાય ગણાનાં તુ ચાલકાય પરાત્પર ।
નારાયણાય કૃષ્ણાય મેઘશ્યામાય તે નમઃ ॥ ૪૨॥

માયાયુક્તતયા નાથ વિષ્ણુરૂપોઽસિ સર્વદા ।
સ્વમહિમ્નિ સ્થિતસ્ત્વં તુ ગણેશસ્તે નમો નમઃ ॥ ૪૩॥

અતો ગણેશ તે નામ વિષ્ણુર્વેદેષુ કથ્યતે ।
યો વિષ્ણુઃ સ હિ વિઘ્નેશો નાન્તરં વિદ્યતે કદા ॥ ૪૪॥

એવં સ્તુત્વા ગણેશાનં પ્રણનામ મહામતિઃ ।
જગાદ વિષ્વક્સેનં ચ તં દેવો વિઘ્નનાયકઃ ॥ ૪૫॥

શ્રીવિઘ્નેશ ઉવાચ ।
વરાન્ વરય મત્તસ્ત્વં વિષ્વક્સેન મહામતે ।
તવ દાસ્યામિ ભક્ત્યાઽહં તુષ્ટઃ સ્તોત્રેણ માનદ ॥ ૪૬॥

ત્વયા કૃતમિદં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
પઠતે શ‍ૃણ્વતે ચૈવ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૭॥

કશ્યપ ઉવાચ ।
ગણેશવચનં શ્રુત્વા વિષ્વક્સેનસ્તમબ્રવીત્ ।
કૃત્વા કરપુટં ભક્ત્યા નમ્રકન્ધર આદરાત્ ॥ ૪૮॥

વિષ્વક્સેન ઉવાચ ।
યદિ પ્રસન્નતાં યાતસ્તદા દેહિ ગજાનન ।
ભક્તિં તે પાદપદ્મે મે શાન્તિયોગં પ્રયચ્છ ચ ॥ ૪૯॥

જગાદ ગણરાજસ્તુ શ્રુત્વા તં હર્ષયન્નિવ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ ન સંશયઃ ॥ ૫૦॥

વિષ્ણુસઙ્ગતિયોગેન શાન્તિયોગમવાપ્સ્યસિ ।

યદ્યદિચ્છસિ તત્તત્તે સફલં ચાઽસ્તુ સર્વદા ॥ ૫૧॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો ભક્તિયન્ત્રિતઃ ।
વિષ્વક્સેનો જગામૈવ વિકુણ્ઠં વિષ્ણુમાનમત્ ॥ ૫૨॥

વૃત્તાન્તં કથયામાસ શ્રુત્વા સંહર્ષિતોઽભવત્ ।
કેશવસ્તૂત્તમં તસ્મૈ મહાયોગં જગાદ ચ ॥ ૫૩॥

સાધયિત્વા યથાન્યાયં યોગિવન્દ્યો બભૂવ હ ।
વિષ્વક્સેનો ગણેશાનમભજદ્ભક્તિસંયુતઃ ॥ ૫૪॥

ગુરુરૂપં મહાવિષ્ણું દેવરૂપં ગણેશ્વરમ્ ।
(Page ખં. ૭ અ. ૧૨ પાન ૨૬)
ધૃત્વા હૃદિ મહાતેજા યોગધ્યાનપરોઽભવત્ ॥ ૫૫॥

ઇદં લક્ષ્મીગણેશસ્ય કથિતં તે ચરિત્રકમ્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં પઠનાચ્છ્રવણાદ્ભવેત્ ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિરઘ્નરાજચરિતે લક્ષ્મીવિનાયકચરિતવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૭.૧૧

## ૭.૧૨ શૂર્પકર્ણાવતારવર્ણનં નામ દ્વાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।
મધુકૈટભનાશાર્થં વિષ્ણુના તપસા પુરા ।
આરાધિતો ગણેશાનસ્તદ્ભક્ત્યા યોગસેવયા ॥ ૧॥

તતઃ પ્રસન્નતાં યાતો વિઘ્નેશઃ પ્રદદૌ વરાન્ ।
તૈર્યુક્તઃ સ જઘાનૈવ દૈત્યૌ પરમદારુણૌ ॥ ૨॥

ગણેશવરદાનેન યશોયુક્તો જનાર્દનઃ ।
તં જેતું કઃ ક્ષમો દેવિ પ્રભવિષ્યતિ તે સુતઃ ॥ ૩॥

અતસ્ત્યક્ત્વા સ્વપુત્રેષુ મમતાં ભજ ભાવતઃ ।
વિઘ્નેશં યોગિનાં તેન વન્દ્યા ત્વં પ્રભવિષ્યસિ ॥ ૪॥

યાદૃશં ગણરાજેન રચિતં ત્રિવિધં પુરા ।
તાદૃશં વર્તતે સર્વં સદેવાસુરમાનુષમ્ ॥ ૫॥

કશ્યપસ્ય વચઃ શ્રુત્વા હર્ષયુક્તા દિતિઃ પુનઃ ।
જગાદ તં સુખાર્થાય યોગિવન્દ્યં પ્રજાપતે ॥ ૬॥

દિતિરુવાચ ।
વિઘ્નરાજાવતારસ્ય ચરિતં પુનરાદરાત્ ।
વદ મે મુનિમુખ્ય ત્વં જ્ઞાનં તસ્ય તથા પરમ્ ॥ ૭॥

કશ્યપ ઉવાચ ।
ધર્મઘ્નસ્ય ચ પુત્રોઽભૂદ્યજ્ઞધ્રુઙ્નામકોઽસુરઃ ।
સ શૈવીં સાધયામાસોપાસનાં પાપનિશ્ચયઃ ॥ ૮॥

પઞ્ચાક્ષરવિધાનેન તોષયામાસ શઙ્કરમ્ ।
દિવ્યૈર્વર્ષસહસ્રૈસ્તં વરદઃ શઙ્કરો યયૌ ॥ ૯॥

સ્તુતઃ સમ્પૂજિતસ્તેન પ્રસન્નસ્તમુવાચ હ ।
વરાન્ વરય દાસ્યામિ તપસા તોષિતોઽસુર ॥ ૧૦॥

સ વવ્રે ત્રિગુણેભ્યો મે મરણં ન ભવેત્ કદા ।
રાજ્યમારોગ્યસંયુક્તં બ્રહ્માણ્ડસ્ય ચ દેહિ ભોઃ ॥ ૧૧॥

યદ્યદિચ્છામિ દેવેશ તત્તન્ મે સફલં ભવેત્ ।
તથેતિ તં જગાદૈવ શઙ્કરોંઽતર્હિતોઽભવત્ ॥ ૧૨॥

તતઃ સ્વગૃહમાગત્ય દૈત્યરાજો બભૂવ હ ।
યજ્ઞધ્રુક્ સૈન્યમાદાય જિગ્યે બ્રહ્માણ્ડમોજસા ॥ ૧૩॥

દેવાઃ શમ્ભુમુખાઃ સર્વે પ્રપેલુશ્ચ દિશો દશ ।
તેષાં પદેષુ દૈત્યેન્દ્રાન્ સ્થાપયામાસ યજ્ઞહા ॥ ૧૪॥

તતો યજ્ઞવિનાશાર્થં યતતે સ્મ વિશેષતઃ ।
યજ્ઞહા ક્રોધસંયુક્તો મુનીન્ સર્વાનતાડયત્ ॥ ૧૫॥

ત્યક્ત્વા મુનિગણા યજ્ઞાન્ પ્રપેલુર્ભયસંયુતાઃ ।
વર્ણસઙ્કરભાવં ચ ચકાર સચરાચરમ્ ॥ ૧૬॥

તતો વિષ્ણુવિનાશાર્થં યતતે સ્મ મહાખલઃ ।
દેવાનાં મૂલનાશાર્થં દૈત્યઃ પરમદારુણૈઃ ॥ ૧૭॥

યજ્ઞો વિષ્ણુઃ સમાખ્યાતો વેદેષુ વેદવાદિભિઃ ।
યજ્ઞનાશે સ્વયં નષ્ટો ભવિષ્યતિ જનાર્દનઃ ॥ ૧૮॥

(Page ખં. ૭ અ. ૧૨ પાન ૨૭)
એવં વિચાર્ય દૈત્યેશો યજ્ઞાન્ સર્વાન્ બભઞ્જ હ ।
યજ્ઞહીનં ચકારૈવ ત્રૈલોક્યં સચરાચરમ્ ॥ ૧૯॥

તતો વિષ્ણુઃ ક્ષુધાવિષ્ટો બભૂવે દેવસંયુતઃ ।
અસ્થિચર્માવિશેષશ્ચ સસ્માર ગણનાયકમ્ ॥ ૨૦॥

રક્ષ માં ગણનાથ ત્વં દૈત્યાત્ પરમદારુણાત્ ।
મરિષ્યામિ ન સન્દેહો યજ્ઞનાશપ્રભાવતઃ ॥ ૨૧॥

દેવૈઃ સાર્ધં મહાવિષ્ણુસ્તતાપ તપ ઉત્તમમ્ ।
એકાક્ષરવિધાનેન તોષયામાસ વિઘ્નપમ્ ॥ ૨૨॥

ગતે વર્ષશતે પૂર્ણે તં યયૌ ગણનાયકઃ ।
સ્તુતઃ સમ્પૂજિતઃ સર્વૈઃ પ્રસન્નો વરદોઽભવત્ ॥ ૨૩॥

તૈર્વૃતો દૈત્યનાશાર્થં તથેતિ ક્રોધસંયુતઃ ।
તાન્ જગાદ યયૌ હન્તું યજ્ઞઘ્નં દેવપૈર્વૃતઃ ॥ ૨૪॥

કૃત્વા યુદ્ધં મહાઘોરં જઘાનાઙ્કુશઘાતતઃ ।
યજ્ઞઘ્નં મુક્તિગં ચક્રે દૈત્યાન્ પાતાલગામિનઃ ॥ ૨૫॥

તતઃ સ દેવસંયુક્તો વિષ્ણુર્મુનિગણૈસ્તથા ।
તુષ્ટાવ સુસ્થિરો ભૂત્વા પૂજ્ય નત્વા કૃતાઞ્જલિઃ ॥ ૨૬॥

શ્રીવિષ્ણુરુવાચ ।
નમસ્તે વિઘ્નરાજાય વિઘ્નાનાં વિઘ્નકારિણે ।
મહાવિઘ્નપ્રશાન્તાય દેવદેવેશ તે નમઃ ॥ ૨૭॥

અનાદયે પરેશાય સર્વાઽઽદૌ સંસ્તુતાય ચ ।
સર્વેભ્યો વરદાત્રે તે વરદાય નમો નમઃ ॥ ૨૮॥

વિનાયકાય સર્વેષાં નાયકાય પરાત્પર ।
ઢુણ્ઢિરાજાય વેદાદિઢુણ્ઢિતાય નમો નમઃ ॥ ૨૯॥

સર્વેભ્યઃ સ્વસ્વરૂપેણ સુખદાય પરાત્મને ।
આનન્દાયાપ્રમેયાય બ્રહ્મણે તે નમો નમઃ ॥ ૩૦॥

ગણાનાં પતયે તુભ્યં નાનાગણસુરૂપિણે ।
સદા સ્વાનન્દનાથાય સિદ્ધિબુદ્ધિપતે નમઃ ॥ ૩૧॥

બ્રહ્મણે વિષ્ણવે તુભ્યં શક્તયે શઙ્કરાય ચ ।
ઇન્દ્રાદિદેવરૂપાય કલયા તે નમો નમઃ ॥ ૩૨॥

મુનયે ક્ષેત્રરૂપાય વૈશ્યાય શૂદ્રરૂપિણે ।
પશુપક્ષ્યાદિરૂપાય વર્ણાશ્રમયુજે નમઃ ॥ ૩૩॥

નાગાય સુરરૂપાય રાક્ષસાય વિહારિણે ।
ચરાચરમયાયૈવ શૂર્પકર્ણાય તે નમઃ ॥ ૩૪॥

ત્રિનેત્રાય ત્રિશૂલસ્ય ધારકાય ચ ચક્રિણે ।
પાશાઙ્કુશધરાયૈવ હેરમ્બાય નમો નમઃ ॥ ૩૫॥

નમસ્તે પરેશાય સર્વાત્મકાય સદા બોધરૂપાય નૈરઞ્જનાય ।
અયોગાય સંયોગમાયાધરાય જનેભ્યઃ સુશાન્તિપ્રદાયાથ ધામ્ને ॥ ૩૬॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યત્ર વેદાશ્ચ યોગિનઃ ।
વિસિસ્મિરે સુશાન્તિસ્થાઃ શાન્તિરૂપાય તે નમઃ ॥ ૩૭॥

યજ્ઞહા નિહતઃ સ્વામિંસ્તેન દેવર્ષયો વયમ્ ।
રક્ષિતાઃ સર્વભાવેન પ્રાણદાતર્નમો નમઃ ॥ ૩૮॥

ભક્તિં દેહિ ગણાધીશ તવ પાદામ્બુજેઽમલામ્ ।
તયા વયં ચ યોગેશ બન્ધહીના ભવામહે ॥ ૩૯॥

એવમુક્ત્વા પ્રણેમુસ્તં દેવા મુનિસમન્વિતાઃ ।
તાંસ્તથેતિ જગાદૈવાંઽતર્દધે શૂર્પકર્ણકઃ ॥ ૪૦॥

તત્ર મૂર્તિં સમાસ્થાય શૂર્પકર્ણસ્ય સર્વદામ્ ।
પૂજ્ય સ્વસ્થાનગાઃ સર્વે બભૂવુર્વિગતજ્વરાઃ ॥ ૪૧॥

સ્વસ્વાચારસમાયુક્તં બભૂવ હ ચરાચરમ્ ।
એવં ચકાર વિઘ્નેશો નાનાદૈત્યવિહિંસનમ્ ॥ ૪૨॥

અવતારા અસઙ્ખ્યાતા વિઘ્નરાજસ્ય શોભને ।
તેષાં વક્તું ચરિત્રાણિ ન સમર્થાઃ શિવાદયઃ ॥ ૪૩॥

સઙ્ક્ષેપેણ મયા તસ્યાઽવતારાઃ કથિતાઃ પરાઃ ।
(Page ખં. ૭ અ. ૧૩ પાન ૨૮)
ભજસ્વ તં વિધાનેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૪૪॥

રજોયુક્તં યથા ધાન્યં રજોહીનં કરોતિ ચ ।

નરૈઃ સંસાધિતં શૂર્પં યોગ્યં ભોજનકાદિષુ ॥ ૪૫॥

તથા માયાવિકારેણ યુક્તં બ્રહ્મ ન લભ્યતે ।
ત્યક્ત્વોપાસનકં તસ્ય શૂર્પકર્ણસ્ય સુન્દરિ ॥ ૪૬॥

શૂર્પકર્ણં સમાશ્રુત્ય મલં ત્યક્ત્વા હૃદિ સ્થિતમ્ ।
બ્રહ્મૈવ નરજાતિસ્થઃ શૂર્પકર્ણસ્તતઃ સ્મૃતઃ ॥ ૪૭॥

બ્રહ્મદઃ શૂર્પવત્ હૃત્સ્થો વેદેષુ કથિતો ભવેત્ ।
તં ભજસ્વ વિધાનેન શાન્તિયુક્તા ભવિષ્યસિ ॥ ૪૮॥

શૂર્પકર્ણાવતારસ્ય કથિતં ચરિતં મયા ।
યજ્ઞઘ્નસ્ય વધાર્થાય બભૂવે દેહધારકઃ ॥ ૪૯॥

ય ઇદં શ ृણુયાદ્વાઽપિ પઠેદ્વા પાઠયેન્નરઃ ।
સ માનસેપ્સિતં લબ્ધ્વા સુખી ભવેન્નિરન્તરમ્ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે શૂર્પકર્ણાવતારવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૭.૧૨

## ૭.૧૩ દત્તગીતાવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

કશ્યપ ઉવાચ ।
એકદા માઘમાસે તુ મકરસ્થે દિવાકરે ।
તીર્થાનિ દેવવિપ્રાદ્યાઃ પ્રયાગં જગ્મુરાદરાત્ ॥ ૧॥

સર્વે સંહૃષ્ટભાવસ્થા માઘસ્નાનપરાયણાઃ ।
ઓઙ્કારગણનાથં તે પુપૂજુર્ભક્તિસંયુતાઃ ॥ ૨॥

તતઃ શૂલભૃતં પૂજ્ય તત્રસ્થં માધવં પ્રિયે ।
ત્રિવેણીં ભાવસંયુક્તાઃ કથાં ચક્રુઃ પુરાતનીમ્ ॥ ૩॥

ભ્રમંસ્તત્રાઽઽજગામૈવ દત્તો યોગીન્દ્રસત્તમઃ ।
અવધૂતસ્ય માર્ગસ્ય પ્રકાશક ઉદાહૃતઃ ॥ ૪॥

ગાણેશં બ્રહ્મપં બ્રહ્મ પરં સર્વાર્થદાયકમ્ ।
ઓઙ્કારગણનાથં સ પ્રણમ્ય સ્તોત્રમારભત્ ॥ ૫॥

તત્ દૃષ્ટ્વા પરમાશ્ચર્યમાયયુસ્તં શિવાદયઃ ।

યોગિનઃ કશ્યપાદ્યાશ્ચાઽન્યે દેવાદય આદરાત્ ॥ ૬॥

તં પ્રણમ્ય સ્થિતાઃ સર્વે યોગીન્દ્રં બ્રહ્મ તત્પરમ્ ।
ગણેશભજને સક્તં દૃષ્ટ્વા પપ્રચ્છુરાદરાત્ ॥ ૭॥

શિવાદય ઊચુઃ ।
ભગવન્ સર્વતત્ત્વજ્ઞ બ્રહ્મભૂતપરાયણ ।
સાક્ષાદ્બ્રહ્મશરીરસ્ત્વં સમાગતો યદૃચ્છયા ॥ ૮॥

અવધૂતસ્ય માર્ગસ્ય પ્રકાશાર્થં વિશેષતઃ ।
દેહધારી ભવાન્નાથ પાવનાય શરીરિણામ્ ॥ ૯॥

તવ દર્શનમાત્રેણ કૃતકૃત્યા વયં પ્રભો ।
જાતાઃ કુલયુતાઃ સ્વામિન્ બોધયસ્વ મુનીન્ સુરાન્ ॥ ૧૦॥

એવં વિનયસંયુક્તૈઃ સ્તુતઃ પૃષ્ટો મહામુનિઃ ।
જગાદ તાન્ મહાભાગાન્ હર્ષેણ મહતાઽઽવૃતઃ ॥ ૧૧॥

દત્તાત્રેય ઉવાચ ।
બ્રહ્મવિષ્ણુશિવાદ્યાશ્ચાઙ્ગિરાદ્યા મુનયોઽમલાઃ ।
શેષાદ્યા નાગરાજાશ્ચ શ઼ૃણુધ્વં મે વચો હિતમ્ ॥ ૧૨॥

બ્રહ્મેદં સર્વમાભાતિ તં ભજધ્વં હિતાય વઃ ।
સમર્થા બ્રહ્મભૂતાશ્ચ ભવિષ્યથ ન સંશયઃ ॥ ૧૩॥

તસ્ય તદ્વચનં શ્રુત્વા પુનઃ સર્વે જગુર્વચઃ ।
હર્ષેણ યોગિવન્દ્યં તં કૃત્વા કરપુટં પ્રિયે ॥ ૧૪॥

(Page ખં. ૭ અ. ૧૩ પાન ૨૯)
શિવાદ્યા ઊચુઃ ।
બ્રહ્મણિ બ્રહ્મભૂતસ્ત્વં ગણેશં ભજસે કથમ્ ।
નામરૂપધરં દેવમોઙ્કારાકૃતિધારકમ્ ॥ ૧૫॥

અસ્માકં કુલદેવોઽયં ત્રિગુણાત્મશરીરિણામ્ ।
મૂલભૂતો ન સન્દેહો યોગિનાં કથમઞ્જસા ॥ ૧૬॥

તેષાં તદ્વચનં શ્રુત્વા સ્મયમાનો મહાયશાઃ ।
દત્તો જગાદ હર્ષેણ જ્ઞાનદાનાર્થમાદરાત્ ॥ ૧૭॥

દત્ત ઉવાચ ।

ગણેશો બ્રહ્મણાં નાથો વેદેષુ પરિકીર્તિતઃ ।
બ્રહ્મ નાનાવિધં તદ્વત્ કથિતં માયયા યુતમ્ ॥ ૧૮॥

અન્નં બ્રહ્મેતિ દેવેશા મુનયઃ શ્ૃણુત પ્રિયાઃ ।
તત્રાન્નમયરૂપા તુ માયા મોહકરી બભૌ ॥ ૧૯॥

પ્રાણો બ્રહ્મેતિ તત્રૈવ પ્રાણાકારવિમોહિની ।
માયા મનોમયી તદ્વન્ મનો બ્રહ્મણિ સંસ્થિતા ॥ ૨૦॥

વિજ્ઞાનં બ્રહ્મ તત્રેયં માયા વિજ્ઞાનરૂપિણી ।
આનન્દં બ્રહ્મ યત્ પ્રોક્તં યુતમાનન્દમાયયા ॥ ૨૧॥

ચૈતન્યં બ્રહ્મ યત્ પ્રોક્તં માયા ચેતનરૂપિણી ।
બિન્દુબ્રહ્મેતિ તત્રૈવ માયા બિન્દુમયી બભૌ ॥ ૨૨॥

સોઽહં બ્રહ્મેતિ યત્રેયં માયા સોઽહં પ્રકાશિની ।
બોધો બ્રહ્મેતિ બોધાખ્યા માયા તત્ર વિમોહિની ॥ ૨૩॥

વિદેહં બ્રહ્મ યત્ પ્રોક્તં માયા વૈ દેહરૂપિણી ।
તયા તત્ર મહાદેવા ભ્રમન્તિ બ્રહ્મમાનિનઃ ॥ ૨૪॥

કર્મ બ્રહ્મેતિ કર્માખ્યા માયા તત્ર વિમોહિની ।
જ્ઞાનં બ્રહ્મેતિ તદ્વત્તુ જ્ઞાનમાયાયુતં બભૌ ॥ ૨૫॥

સમં બ્રહ્મેતિ તત્રૈવ માયા સમસ્વરૂપિણી ।
સહજં બ્રહ્મ યત્ પ્રોક્તં સહજાખ્યવિકારદમ્ ॥ ૨૬॥

અસદ્બ્રહ્મેતિ યત્ પ્રોક્તં તત્રાસન્માયયા યુતમ્ ।
સદ્બ્રહ્મેતિ સદાકારમાયાયુક્તં પ્રકીર્તિતમ્ ॥ ૨૭॥

સદસન્મયભાવાખ્યં બ્રહ્મ પ્રોક્તં મુનીશ્વરાઃ ।
ઉભયાત્મવિકારેણ જ્ઞાતવ્યં સંયુતં સદા ॥ ૨૮॥

અવ્યક્તં બ્રહ્મ યત્ પ્રોક્તં યુતમવ્યક્તમાયયા ।
સ્વસંવેદ્યં પરં બ્રહ્મ યુતં સ્વાનન્દમાયયા ॥ ૨૯॥

આત્માદ્વયૈકસર્વાખ્યાદ્યાઃ શબ્દાઃ પરિકીર્તિતાઃ ।
મહાવાક્યાદિભિસ્તે તુ તત્તન્માયાપ્રકાશકાઃ ॥ ૩૦॥

શિવવિષ્ણુમુખાઃ શબ્દા બ્રહ્મવાચ્યાઃ પ્રકીર્તિતાઃ ।
તત્તદ્વિકારસંયુક્તાન્ જાનીત દેવસત્તમાઃ ॥ ૩૧॥

પૃથ્વી જલાદિતત્ત્વાનિ બ્રહ્મણાં વાચકાનિ તુ ।
તત્તદ્વિકારયુક્તાનિ જાનીત દેવસત્તમાઃ ॥ ૩૨॥

એવં નાનાવિધાન્યેવ બ્રહ્માણિ કથિતાનિ ચ ।
વેદાદિષુ સમસ્તાનિ માયામોહયુતાનિ તુ ॥ ૩૩॥

તેષાં સ્વામિસ્વરૂપેણ તિષ્ઠતિ બ્રહ્મણસ્પતિઃ ।
બ્રહ્મણાં પાતૃભાવાચ્ચ પાલયિતૃત્વકારણાત્ ॥ ૩૪॥

સ એવાયં ગણાધ્યક્ષો વેદેષુ કથિતોઽભવત્ ।
બ્રહ્મભૂયમયઃ સાક્ષાત્તં ભજામિ દ્વિજોત્તમાઃ ॥ ૩૫॥

ઉત્પત્તિનાશહીનં યદ્ ગજાખ્યં બ્રહ્મ ચક્ષતે ।
સાઙ્ખ્યં શિરો ગણેશસ્ય ગજાનન ઇતિ સ્મૃતઃ ॥ ૩૬॥

ભૂમિસાધનભાવેન ભવેત્ બ્રહ્મણિ તન્મયઃ ।
દેહસ્તસ્ય ચ યોગાખ્યો નાનાભૂમિપ્રધારણાત્ ॥ ૩૭॥

તયોર્યોગે ગણેશાનો દેહધારી બભૂવ હ ।
સાઙ્ખ્યે યોગમયઃ સાક્ષાત્ પૂર્ણશાન્તિપ્રદાયકઃ ॥ ૩૮॥

સંયોગેઽયં ગકારાખ્યો હ્યયોગે ણમયઃ સ્મૃતઃ ।
તયોરીશો ગણેશાનો નામાઽયં વેદવાદતઃ ॥ ૩૯॥

(Page ખં. ૭ અ. ૧૩ પાન ૩૦)
પઞ્ચચિત્તમયી બુદ્ધિર્દક્ષિણાઙ્ગં બભૂવ હ ।
પઞ્ચભ્રાન્તિકરી સિદ્ધિર્વામાઙ્ગં તસ્ય સર્વદા ॥ ૪૦॥

તયોઃ સ્વામી ગણાધ્યક્ષો માયાભ્યામત્ર ખેલતિ ।
ચિત્તે ચિન્તામણિઃ સાક્ષાત્ પ્રકાશકારકસ્તયોઃ ॥ ૪૧॥

સમોહં ચિત્તમુત્સૃજ્ય યોગીન્દ્રો જાયતે નરઃ ।
તં ભજામિ વિશેષેણ ચિત્તચાલનકારકમ્ ॥ ૪૨॥

કૃતાનિ સિદ્ધિબુદ્ધિભ્યાં બ્રહ્માણિ સકલાનિ વૈ ।
તાનિ ત્યક્ત્વા કથં બ્રહ્મ લભ્યતે માનવૈઃ પરમ્ ॥ ૪૩॥

અતોઽયં દેહભૃદ્ભૂત્વા ભક્તમાર્ગપ્રદાયકઃ ।
સુલભત્વાય દેવેશા પરો જાનીત સંસ્થિતઃ ॥ ૪૪॥

તસ્ય તદ્વચનં શ્રુત્વા વસિષ્ઠસ્તમુવાચ હ ।
સંશયસ્ય વિનાશાર્થં સર્વૈઃ સમ્પ્રેરિતો વચઃ ॥ ૪૫॥

વસિષ્ઠ ઉવાચ ।
બ્રહ્મ બ્રહ્મૈવ વેદેષુ કથિતં સર્વસમ્મતમ્ ।
બ્રહ્મણસ્પતિરેકોઽયં પતિસ્તત્ર કથં મુને ॥ ૪૬॥

પતિરૂપા મહામાયા ગણેશે સંસ્થિતાઽભવત્ ।
યથાઽન્નાદિવિકારસ્થં બ્રહ્મ તદ્વદયં મતઃ ॥ ૪૭॥

વસિષ્ઠસ્ય વચઃ શ્રુત્વા દત્તો હર્ષસમન્વિતઃ ।
જગાદ તં વિશેષજ્ઞં યોગીન્દ્રઃ પરમાર્થવિત્ ॥ ૪૮॥

અન્નપ્રાણાદિયુક્તાનિ બ્રહ્માણિ રચિતાનિ તુ ।
ગણેશેન મહાયોગિંસ્તેનાયં પતિરુચ્યતે ॥ ૪૯॥

બ્રહ્મભિઃ કથિતશ્ચાયં પતિસ્તેષાં ન સંશયઃ ।
સ્વયં બ્રહ્મૈવ તન્નાશે તથાઽપિ પાતૃભાવતઃ ॥ ૫૦॥

અન્નપ્રાણાદિકાન્યેવ વિકારાન્ સન્ત્યજન્તિ ચ ।
બ્રહ્માણિ બ્રહ્મભૂતાનિ ભવિષ્યન્ત્યસ્ય સેવનાત્ ॥ ૫૧॥

બ્રહ્માણિ બ્રહ્મણિ યદિ ચેદ્ગતાનિ મહામુને ।
પતિઃ કેષાં ગણેશાનઃ કથ્યતે કૈર્વદાશુ મે ॥ ૫૨॥

અતો માયાવિકારેણ હીનોઽયં ગણનાયકઃ ।
બ્રહ્મૈવોપાસ્યભાવાત્તુ પતિત્વં કથનાત્મકમ્ ॥ ૫૩॥

ઇતિ તસ્ય વચઃ શ્રુત્વા પુનસ્તં નારદોઽબ્રવીત્ ।
યોગીન્દ્રં ભાવબોધાર્થમવધૂતમકલ્મષમ્ ॥ ૫૪॥

નારદ ઉવાચ ।
ગણેશે ત્વં મહાયોગિંસ્તદાકારો ન સંશયઃ ।
અહં દત્તોઽયમેકશ્ચ ગણેશઃ કુત્ર વર્તતે ॥ ૫૫॥

ન ભિન્નશ્ચેન્ મહાભાગ ભજસે કં પુરઃ સ્થિતમ્ ।
ઇમં મે સંશયં છિન્ધિ સર્વજ્ઞોઽસિ મહામતે ॥ ૫૬॥

દત્ત ઉવાચ ।
દેહોઽયં નરતુલ્યો મે કરોતિ કર્મ નિત્યદા ।

શુભાશુભં વિશેષેણ નામરૂપવિકારતઃ ॥ ૫૭॥

બ્રહ્મ સર્વત્ર વિપ્રેશ તન્મયં નાત્ર સંશયઃ ।
સત્તા ન્યૂનાધિકા ભાતિ વિચારય વિચક્ષણ ॥ ૫૮॥

બ્રહ્મણસ્પતિશબ્દાખ્યા સત્તા ગણપતૌ સ્થિતા ।
નાન્યત્ર શમ્ભુવિષ્ણ્વાદિ ભાવેષુ પશ્ય માનદ ॥ ૫૯॥

અતઃ પ્રત્યક્ષચિત્તસ્થં બ્રહ્મ વિઘ્નેશવાચકમ્ ।
દૃષ્ટ્વા તન્ન ભજેત્ કોઽપિ બ્રહ્મભૂયપરઃ કથમ્ ॥ ૬૦॥

અતો દેહધરોઽહં તુ બ્રહ્માકારો ગણેશ્વરઃ ।
તં ભજામિ વિશેષેણ દેહચેષ્ટાપરાયણઃ ॥ ૬૧॥

દેહઃ ક્રિયાત્મકઃ પ્રોક્તશ્ચિત્તં ચિન્તનકારકમ્ ।
સ્વભાવેન યથાઽન્યદ્વૈ કરોતિ ચિન્તનાદિકમ્ ॥ ૬૨॥

તથા ગણેશ્વરં મેઽત્ર દેહશ્ચિત્તં ભજેત્ ધ્રુવમ્ ।
તયોઃ પ્રકાશકં બ્રહ્મ કથં ભજેદ્ગજાનનમ્ ॥ ૬૩॥

બ્રહ્મ બ્રહ્મૈવ સઞ્જાતં તદાકારં મદીયકમ્ ।
દેહશ્ચિત્તં ભજેત્તં વૈ સ્વપ્રકાશકરં સદા ॥ ૬૪॥

(Page ખં. ૭ અ. ૧૪ પાન ૩૧)
અનેન યોગમાર્ગેણ ભજામિ ગણનાયકમ્ ।
ન ભિન્નોઽહં ગણેશાનાત્ કં પૃચ્છસિ વિચારય ॥ ૬૫॥

યથા કરોમિ નિત્યં તુ ભક્ષણાદિકમાદરાત્ ।
તથા ગણેશ્વરં તાત ભજામિ ભક્તિસંયુતઃ ॥ ૬૬॥

નાઽહં ભોક્તા સ્વદેહસ્થસ્તથા માં વિદ્ધિ દેહગમ્ ।
ન ભક્તં ગણરાજસ્ય દેહધર્મઃ પ્રવર્તતે ॥ ૬૭॥

બ્રહ્મણિ બ્રહ્મભૂતો યો ન ભજેદ્ગણનાયકમ્ ।
તથાઽપિ દેહચિત્તેઽન્યત્ કરિષ્યતઃ સ્વભાવતઃ ॥ ૬૮॥

ન મુખ્યો બ્રહ્મભૂતેષુ યોગિષુ ભક્ત ઉચ્યતે ।
શ્રેષ્ઠસ્તસ્માદ્ગણેશાનં ભજામિ હર્ષસંયુતઃ ॥ ૬૯॥

અનાયાસેન ચિત્તસ્થં દેહસ્થં બ્રહ્મ પ્રાપ્ય યઃ ।
દૃષ્ટ્વા તં ન ભજેત્ સોઽપિ બ્રહ્મઘ્નઃ પરિકીર્તિતઃ ॥ ૭૦॥

ગણેશં મૂર્તિગં દૃષ્ટ્વા યોગેશં શાન્તિદાયકમ્ ।
કસ્ય યોગિજનસ્યાત્ર પ્રીતિઃ સદ્યો ન જાયતે ॥ ૭૧॥

ઇતિ તસ્ય વચઃ શ્રુત્વા હર્ષયુક્તાઃ શિવાદયઃ ।
નારદાદ્યાઃ પ્રણેમુસ્તં વિસ્મિતાસ્તસ્ય ચેષ્ટિતૈઃ ॥ ૭૨॥

જગુસ્તં હર્ષસંયુક્તા વયં સંશયવર્જિતાઃ ।
કૃતાસ્ત્વયા મહાભાગ એકમાર્ગપરાયણાઃ ॥ ૭૩॥

નાનામતવિભેદેન ભ્રાન્તિયુક્તા ભ્રમન્તિ તુ ।
ત્યક્ત્વા ગણેશ્વરં પૂર્ણં સર્વપૂજ્યં મહામુને ॥ ૭૪॥

ભ્રાન્તિનાશાર્થમત્યન્તં ભવાન્ વિઘ્નેશ્વરેણ ચ ।
નિર્મિતો યોગમાર્ગજ્ઞઃ સર્વશાન્તિપ્રદાયકઃ ॥ ૭૫॥

એવં તૈઃ સંસ્તુતો દત્તઃ પ્રહસ્ય પ્રયયૌ તતઃ ।
શિવાદયો વસિષ્ઠાદ્યાઃ સ્વાલયં પ્રયયુઃ પ્રિયે ॥ ૭૬॥

સર્વસારાં સમાખ્યાતાં ગીતાં દત્તમુખાચ્ચ્યુતામ્ ।
પઠનાચ્છ્રવણાન્નૃભ્યઃ શાન્તિદાં સર્વસિદ્ધિદામ્ ॥ ૭૭॥

કશ્યપસ્ય વચઃ શ્રુત્વા હર્ષિતા તં પ્રણમ્ય સા ।
જગાદ ભાવગમ્ભીરા દિતિર્વિઘ્નેશ્વરે રતા ॥ ૭૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે દત્તગીતાવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૭.૧૩

## ૭.૧૪ દિતિવરપ્રદાનં નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દિતિરુવાચ ।
ગણેશસ્ય મહાભાગ વદોપાસનકં પ્રભો ।
તેન વિઘ્નેશ્વરં ભક્ત્યા ભજિષ્યામિ નિરન્તરમ્ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો મહાયોગી દિત્યા તસ્યૈ દદૌ મનુમ્ ।
દશાક્ષરં ગણેશસ્ય વિધિયુક્તં વિધાનવિત્ ॥ ૨॥

સા તં પ્રણમ્ય યોગીન્દ્રં કશ્યપં પ્રયયૌ તતઃ ।
વનં વૃક્ષાદિસંયુક્તં તપસ્તત્ર તતાપ વૈ ॥ ૩॥

નિરાહારેણ સંયુક્તા ગણેશધ્યાનતત્પરા ।
નાસાગ્રન્યસ્તદૃષ્ટિઃ સા મન્ત્રજાપં ચકાર ચ ॥ ૪॥

ત્યક્ત્વા સર્વાં કામનાં સા દિતિર્વિઘ્નેશ્વરે રતા ।
તપઃ પ્રભાવયોગેન ભ્રાન્તિહીનાઽભવદ્વિધે ॥ ૫॥

(Page ખં. ૭ અ. ૧૪ પાન ૩૨)
પુત્રપૌત્રાદિકે ભાવે રસહીના બભૂવ હ ।
યોગેપ્સુઃ પૂર્ણભાવેનાઽભજત્તં દ્વિરદાનનમ્ ॥ ૬॥

એવં વર્ષસહસ્રેણ યોગભૂતિપરાયણા ।
શાન્તિયોગં સમાસાદ્ય યોગિવન્દ્યા બભૂવ સા ॥ ૭॥

તથા સા દત્તમાર્ગં તં દિતિઃ સસ્માર ચેતસિ ।
ભક્ત્યા વિઘ્નેશ્વરં દેવી ન મુમોચ કદાચન ॥ ૮॥

તતઃ પ્રસન્નભાવેન તાં યયૌ ગણનાયકઃ ।
જગાદાઽસૌ વરાન્ બ્રૂહિ ધ્યાનસ્થાં મનસેપ્સિતાન્ ॥ ૯॥

ગણેશવચનં શ્રુત્વા દિતિર્હર્ષસમન્વિતા ।
ઉત્થાય તં નમસ્કૃત્ય પૂજયામાસ ભક્તિતઃ ॥ ૧૦॥

પુનઃ પ્રણમ્ય વિઘ્નેશં સા તુષ્ટાવ કૃતાઞ્જલિઃ ।
ગણેશં દક્ષ તે પુત્રી દિતિઃ સાશ્રુમુખામ્બુજા ॥ ૧૧॥

દિતિરુવાચ ।
નમસ્તે વિઘ્નરાજાય ભક્તવિઘ્નવિદારણ ।
અભક્તેભ્યો મહાવિઘ્નપ્રદાય તુ નમો નમઃ ॥ ૧૨॥

કાશ્યપાય પરેશાય વિનાયકાય ઢુણ્ઢયે ।
લમ્બોદરાય તે સર્વભોગભોક્ત્રે નમો નમઃ ॥ ૧૩॥

દીનાનાં પતયે તુભ્યં દીનદીનાય તે નમઃ ।
દીનપાલકનાથાય હેરમ્બાય નમો નમઃ ॥ ૧૪॥

પરેશાય ગણેશાય પરાત્પરતમાય તે ।
પરાત્પરાણાં કર્ત્રે તે મહોદરાય વૈ નમઃ ॥ ૧૫॥

અનાદયે ચ સર્વેષામાદિમૂર્તિધરાય ચ ।
આદિપૂજ્યાય સર્વેષામન્તઃસ્થાય નમો નમઃ ॥ ૧૬॥

શિવપુત્રાય વિષ્ણોશ્ચ પુત્રાય પરમાત્મને ।
વરેણ્યસૂનવે તુભ્યં શેષપુત્રાય તે નમઃ ॥ ૧૭॥

સર્વપૂજ્યાય જ્યેષ્ઠાય જ્યેષ્ઠાનાં જ્યેષ્ઠમૂર્તયે ।
જ્યેષ્ઠરાજતમાયૈવ માત્રે પિત્રે નમો નમઃ ॥ ૧૮॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મભ્યો બ્રહ્મદાયિને ।
બ્રહ્મણાં બ્રહ્મરૂપાયૈકદન્તાય નમો નમઃ ॥ ૧૯॥

ગજાનનાય દેવાયાસુરાય સમભાવિને ।
યોગાકારાય યોગિભ્યો યોગદાય નમો નમઃ ॥ ૨૦॥

કિં સ્તૌમિ ત્વાં ગણાધીશ શાન્તીનાં શાન્તિરૂપિણમ્ ।
વેદાદયઃ શિવાદ્યાશ્ચ યત્ર શાન્તિં પ્રલેભિરે ॥ ૨૧॥

અતસ્ત્વાં પ્રણમામ્યેવ સર્વેઽશં તેન વિઘ્નપ ।
સન્તુષ્ટો ભવ મે ભક્ત્યા સ્વલ્પયા નાથ તે નમઃ ॥ ૨૨॥

યદિ ત્વં વરદો મેઽસિ તદા મે પુત્ર આદરાત્ ।
ભવ સ્વામિન્ દયાસિન્ધો તેનાઽહં તારિતા ત્વયા ॥ ૨૩॥

આસુરી પ્રકૃતિઃ પ્રોક્તા વેદેષુ દ્વિરદાનન ।
સાઽહં કયા મહાભક્ત્યા ભજિષ્યામિ નિરન્તરમ્ ॥ ૨૪॥

ત્વં મે પુત્રો યદા નાથ ભવિષ્યસિ સુસિદ્ધિદઃ ।
તવ માતુઃ કથં માયામયો બન્ધઃ કદાચન ॥ ૨૫॥

ભક્તિં ત્વચ્ચરણે ઢુણ્ઢે દેહિ નિત્યં વિશેષતઃ ।
આસુરીં બન્ધહીનાં માં કુરુષ્વ ત્વત્પદપ્રિયામ્ ॥ ૨૬॥

એવમુક્ત્વા ગણાધીશં નનામ દક્ષનન્દિની ।
દિતિસ્તાં ગણરાજશ્ચ જગાદ હર્ષસંયુતઃ ॥ ૨૭॥

વિઘ્નેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મદીયં મત્પ્રિયં ભવેત્ ।
પઠતે શ‍ૃણ્વતે દેવિ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૮॥

તવ પુત્રો ભવિષ્યામિ આસુરીભાવનાશકઃ ।

ત્વં ભજિષ્યસિ માં નિત્યં ભક્ત્યા ભાવપરાયણા ॥ ૨૯॥

એવમુક્ત્વાંऽતર્દધેऽસૌ વિઘ્નેશો બ્રહ્મનાયકઃ ।
દિતિઃ સ્વગૃહમાગત્ય પ્રણનામ પતિં સ્વકમ્ ॥ ૩૦॥

(Page ખં. ૭ અ. ૧૫ પાન ૩૩)
વૃત્તાન્તં કથયામાસ કશ્યપો હર્ષિતોऽભવત્ ।
શ્રુત્વા તાં સ સમાલિઙ્ગ્ય જગાદ સાશ્રુલોચનઃ ॥ ૩૧॥

કશ્યપ ઉવાચ ।
ધન્યાऽસિ કૃતકૃત્યાऽસિ સફલસ્તે ભવો મતઃ ।
યયા દૃષ્ટો ગણાધ્યક્ષઃ સર્વેભ્યઃ શાન્તિદાયકઃ ॥ ૩૨॥

અહો તે સસુતો દેવિ અસુર્યાઃ પ્રભવિષ્યતિ ।
મહદ્ભાગ્યં ગણાધીશો યોગિવન્દ્યો ત્વમઞ્જસા ॥ ૩૩॥

તારિતોऽહં ત્વયા નૂનં સુસ્ત્રિયા ગણપે રતઃ ।
ધન્યં મે જન્મકર્માદિ આસુરી સ્વહિતે રતા ॥ ૩૪॥

એવમુક્ત્વા દિતિં વિપ્રઃ કશ્યપો વિરરામ હ ।
દિતિઃ પ્રણમ્ય તં વિપ્રં સેવાયાં સંસ્થિતાऽભવત્ ॥ ૩૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે દિતિવરપ્રદાનં નામ ચતુર્દશોऽધ્યાયઃ ॥ ૭.૧૪

## ૭.૧૫ ચતુર્ભુજાવતારવિક્રમવર્ણનં નામ પઞ્ચદશોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતઃ સા ગણનાથં તં સસ્માર હૃદિ સર્વદા ।
તન્મયં વિશ્વમેવેદમાલોકયદશેષતઃ ॥ ૧॥

એકદા માઘમાસે તુ શુક્લપક્ષે ગજાનનમ્ ।
પુપૂજ મધ્યગે ભાનૌ ચતુર્થ્યાં મૂર્તિગં પરમ્ ॥ ૨॥

મૂર્તિમધ્યાદ્ગણાધીશઃ પ્રકટોભૂચ્ચતુર્ભુજઃ ।
અનન્તસૂર્યસઙ્કાશતેજોયુક્તઃ પ્રજાપતે ॥ ૩॥

તં દૃષ્ટ્વા ભયભીતા સા સસ્માર હૃદિ કશ્યપમ્ ।

સ્વગુરું તં તથા દેવં ગણેશં ભક્તિસંયુતા ॥ ૪॥

ગુરોઃ સ્મરણમાત્રેણ ગણેશઃ સૌમ્યરૂપધૃક્ ।
બાલરૂપો દિતિં દેવીં જગાદ મેઘનિઃસ્વનઃ ॥ ૫॥

શ્રીગણેશ ઉવાચ ।
પુત્રોઽહં તે મહાભાગે વરદાનપ્રભાવતઃ ।
મા ભયં કુરુ કલ્યાણિ પશ્ય માં સૌમ્યરૂપિણમ્ ॥ ૬॥

તતઃ સોન્મીલ્ય ચક્ષુસ્તં પશ્યતિ સ્મ ભયાતુરા ।
બાલં ચતુર્ભુજં દેવં શુણ્ડાદણ્ડધરં પરમ્ ॥ ૭॥

પરશ્વાદિમહાસ્ત્રૈશ્ચ સંયુતં ચન્દ્રશેખરમ્ ।
લમ્બોદરં ચૈકદન્તં શેષનાભિસમાયુતમ્ ॥ ૮॥

શૂર્પકર્ણં ત્રિનેત્રં તુ નાનાભૂષણભૂષિતમ્ ।
અમૂલ્યવસ્ત્રસંયુક્તં ગલે ચિન્તામણિં ધરમ્ ॥ ૯॥

દૃષ્ટ્વા તં પ્રણનામૈવ કશ્યપેન સમન્વિતા ।
તુષ્ટાવાઽઽપૂજ્ય વિઘ્નેશમથર્વશિરસા વિભુમ્ ॥ ૧૦॥

તતસ્તં કશ્યપો નત્વા પ્રાર્થયામાસ શાન્તિદમ્ ।
બાલરૂપો ભવ સ્વામિન્ યેન તે લાલનં ભવેત્ ॥ ૧૧॥

ધન્યોઽહં કૃતકૃત્યોઽહં મત્સમો ન પ્રવિદ્યતે ।
મમ ત્વં યેન પુત્રોઽભૂદ્બ્રહ્મણાં ગણનાયકઃ ॥ ૧૨॥

યસ્ય રોમાઞ્ચરન્ધ્રેષુ બ્રહ્માણ્ડાનાં હિ કોટયઃ ।
કથં સ મમ પુત્રત્વં પ્રાપ્તોઽસીતિ વિડમ્બનમ્ ॥ ૧૩॥

એવં સમ્પ્રાર્થિતસ્તેન દિત્યા સોઽપિ તથાઽભવત્ ।
ચતુર્ભુજધરો બાલો બભૂવે તત્ક્ષણાત્ સ્વયમ્ ॥ ૧૪॥

(Page  ખં. ૭ અ. ૧૫ પાન ૩૪)
તં પ્રણમ્ય ગણાધીશં કશ્યપો હર્ષસંયુતઃ ।
દિત્યા કર્મપરો ભૂત્વા બ્રાહ્મણાંશ્ચ સમાહ્વયત્ ॥ ૧૫॥

તતશ્ચતુર્ભુજેનૈવ માયાઽઽક્ષિપ્તા તયોર્હૃદિ ।
પુત્રભાવપ્રકાશાર્થં તથા તૌ સમ્બભૂવતુઃ ॥ ૧૬॥

સ્નાપયિત્વા દિતિર્બાલં સ્તનપાનમકારયત્ ।

જાતકર્મ ચકારૈવ કશ્યપો હર્ષસંયુતઃ ॥ ૧૭॥

દ્વાદશેઽહ્નિ દ્વિજાસ્તત્ર નામકર્માર્થમાયયુઃ ।
પૂજિતાઃ કશ્યપેનૈવ તમૂચુર્હર્ષસંયુતાઃ ॥ ૧૮॥

સ્વર્ગેષુ દેવપાંશ્ચાઽયં નરાન્ પૃથ્વ્યાં તથા તલે ।
અસુરાન્ નાગકૂર્માદીન્ સ્થાપયિષ્યતિ બાલકઃ ॥ ૧૯॥

તત્ત્વાનિ ચાલયન્ વિપ્ર તસ્માન્નામ્ના ચતુર્ભુજઃ ।
ચતુર્ણાં વિવિધાનાં ચ સ્થાપકોઽયં મતો બુધૈઃ ॥ ૨૦॥

મુદ્ગલ ઉવાચ ।
તતો વર્ષે દ્વિતીયેઽસ્ય પ્રહ્લાદપ્રમુખાઃ પરે ।
પ્રપેલુર્હન્યમાનાસ્તૈર્દેવૈર્વિષ્ણુમુખૈર્વિધે ॥ ૨૧॥

સર્વં ત્યક્ત્વાઽસુરેશાનાઃ પાતાલં વિવિશુર્ભયાત્ ।
દેવાનાં ચ સ્વયં વિષ્ણુઃ ક્રોધયુક્તો બભૂવ હ ॥ ૨૨॥

ઇન્દ્રાદ્યૈઃ સહિતઃ સોઽપિ સન્નદ્ધશ્ચક્રસંયુતઃ ।
આયયૌ દૈત્યનાશાર્થં પાતાલેષુ મહાબલઃ ॥ ૨૩॥

ચક્રં તત્યાજ દેવેશસ્તેન દૈત્યા મૃતા મૃધે ।
કેચિદ્ દુઃખસમાયુક્તાઃ પ્રપેલુશ્છિન્નદેહકાઃ ॥ ૨૪॥

શરણં કેશવં ચૈવ કેચિજ્જગ્મુઃ પ્રજાપતે ।
તથાપિ તાન્ મહાવિષ્ણુર્જઘાન ક્રોધસંયુતઃ ॥ ૨૫॥

અસુરૈર્વિગતં વિશ્વં કર્તું ચૈવ સમુદ્યતઃ ।
દૈત્યેન્દ્રા ભયસંયુક્તા દિતિં યયુઃ શરણ્યદામ્ ॥ ૨૬॥

છિન્નભિન્નકૃતાઙ્ગાંસ્તાન્ દિતિર્દૃષ્ટ્વા શુશોચ હ ।
તતઃ ક્રોધયુતઃ સોઽપિ બભૂવે ગણનાયકઃ ॥ ૨૭॥

તત્યાજ પરશું તીક્ષ્ણં દેવાન્ હન્તું ચતુર્ભુજઃ ।
પરશોસ્તેજસા સર્વં વ્યાપ્તં પાતાલમણ્ડલમ્ ॥ ૨૮॥

વ્યર્થરૂપાણિ શસ્ત્રાણિ ચક્રાદીન્યભવન્ મૃધે ।
દેવા દાહસમાયુક્તાઃ પ્રપેલુશ્ચ દિશો દશ ॥ ૨૯॥

તતસ્તત્ર યયૌ બ્રહ્મા બોધયામાસ કેશવમ્ ।
પાતાલં ત્યજ્ય સર્વે તે યયુઃ સ્વર્ગં ભયાન્વિતાઃ ॥ ૩૦॥

પરશોસ્તેજસા તત્ર સન્દગ્ધા ઇવ દેવપાઃ ।
ન શાન્તિં પ્રલભન્તે સ્મ હાહાકારરવાકુલાઃ ॥ ૩૧॥

તતઃ શમ્ભૂ રવિર્બ્રહ્મા કેશવસ્તુષ્ટુવુઃ પરમ્ ।
પરશું ભયસંયુક્તા દેવૈર્મુનિગણૈઃ સહ ॥ ૩૨॥

શાન્તિયુક્તં મહાસ્ત્રં તદ્બભૂવે ચ પ્રજાપતે ।
તતો દેવેન્દ્રકાઃ સર્વે ચતુર્ભુજં યયુઃ પુરા ॥ ૩૩॥

તં પ્રણમ્ય ભયોદ્વિગ્ના મુનિભિર્દેવનાયકાઃ ।
નત્વાઽઽપૂજ્ય ગણેશાનં તુષ્ટુવુઃ કરસમ્પુટાઃ ॥ ૩૪॥

દેવર્ષય ઊચુઃ ।
નમસ્તે કાશ્યપાયૈવ ચતુર્ભુજાય ઢુણ્ઢયે ।
અનાદયે ગણેશાય વિઘ્નેશાય નમો નમઃ ॥ ૩૫॥

પરેશાય પરેષાં ચ પતયે પરમાત્મને ।
વિનાયકાય વિપ્રેભ્યો વરદાય નમો નમઃ ॥ ૩૬॥

લમ્બોદરાય સર્વેષામુદરસ્થાય તે નમઃ ।
મહોદરાય જ્યેષ્ઠાય બ્રાહ્મણાય નમો નમઃ ॥ ૩૭॥

ક્ષત્રાણાં ક્ષાત્રધર્માય વૈશ્યાનાં વૈશ્યરૂપિણે ।
શૂદ્રાણાં શૂદ્રધર્માય વર્ણહીનાય તે નમઃ ॥ ૩૮॥

ગૃહસ્થાનાં ગૃહસ્થાય બ્રહ્મચર્યાય સર્વપ ।
બ્રહ્મચારિસ્વરૂપાણાં વનસ્થાનાં તદાત્મને ॥ ૩૯॥

ન્યાસિનાં ન્યાસધર્માયાશ્રમહીનાય તે નમઃ ।
ચતુર્ષુ તે પઞ્ચમાય હેરમ્બાય નમો નમઃ ॥ ૪૦॥

(Page ખં. ૭ અ. ૧૫ પાન ૩૫)
સ્વાનન્દવાસિને તુભ્યં સિદ્ધિબુદ્ધિવરાય ચ ।
એકદન્તાય દેવાયાસુરાય તે નમો નમઃ ॥ ૪૧॥

અનાથાનામનાથાય સનાથાનાં સનાથક ।
ઈશ્વરાણાં મહેશાય વિષ્ણવે તે નમો નમઃ ॥ ૪૨॥

બ્રહ્મણે ભાનવે તુભ્યં શક્તયે સર્વરૂપિણે ।

દેવાદિભ્યઃ પ્રદાત્રે તે પદાનાં વૈ નમો નમઃ ॥ ૪૩॥

કિં સ્તુમસ્ત્વાં ચતુર્ણાં ચ ચાલકં સ્વભુજૈઃ પરમ્ ।
અતસ્ત્વાં પ્રણમામો વૈ ચતુર્ભુજ પ્રસીદ નઃ ॥ ૪૪॥

એવમુક્ત્વા પ્રણેમુસ્તં દેવા મુનિસમન્વિતાઃ ।
સ તાનુવાચ પ્રીતાત્મા ભક્તાન્ ભક્તજનપ્રિયઃ ॥ ૪૫॥

ચતુર્ભુજ ઉવાચ ।
વરાન્ બ્રૂત મહાદેવા મુનયો મત્ત ઈપ્સિતાન્ ।
દાસ્યામિ સ્તોત્રતુષ્ટોઽહં ભવતાં ભયવર્જિતાઃ ॥ ૪૬॥

સ્તોત્રં ભવત્કૃતં દેવાઃ સર્વસિદ્ધિપ્રદં ભવેત્ ।
પઠતાં શૃણ્વતાં ચૈવ ભયનાશકરં પરમ્ ॥ ૪૭॥

વિશેષતઃ પુત્રપૌત્રાદિકં સર્વં લભેન્નરઃ ।
ધનધાન્યાદિકં ચાન્તે મલ્લોકં પઠનાત્ પરમ્ ॥ ૪૮॥

એવં તસ્ય વચઃ શ્રુત્વા દેવા મુનિસમન્વિતાઃ ।
ભયહીનાઃ પ્રણેમુસ્તં જગુર્હર્ષસમન્વિતાઃ ॥ ૪૯॥

દેવર્ષય ઊચુઃ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ચતુર્ભુજ ।
તદા તે પાદપદ્મે વૈ ભક્તિરસ્તુ નિરન્તરમ્ ॥ ૫૦॥

આજ્ઞાં કુરુ મહાભાગ તથા વર્તામહે વયમ્ ।
દિતિજદૈત્યસન્ત્રાસતાપિતાઃ સતતં વયમ્ ॥ ૫૧॥

ચતુર્ભુજ ઉવાચ ।
અદ્ય પ્રભૃતિ દેવેશાઃ પાતાલસ્થાન્ મહાસુરાન્ ।
મા હિંસ્યથ મહાભાગા મયા સંસ્થાપિતાન્ પુરા ॥ ૫૨॥

સ્વર્ગેષુ ચામરસ્થાનં પૃથિવ્યાં ચ નૃણાં સદા ।
પાતાલે દાનવાદીનાં સ્વધર્મસ્થા ભવન્તુ તે ॥ ૫૩॥

યદિ ભૂત્વા વિપથગા ઇમે ગર્વેણ મોહિતાઃ ।
સિદ્ધિર્ન ભવિતા તેષાં મદ્વાક્યાન્નાત્ર સંશયઃ ॥ ૫૪॥

તથેતિ તં પ્રણમ્યૈવ દેવાઃ સ્વસ્થાનમાયયુઃ ।
તદાદિ દાનવાન્ દેવા ન જઘ્નુઃ સ્થલસંશ્રિતાન્ ॥ ૫૫॥

ચતુર્ભુજશ્ચ દૈત્યેન્દ્રાન્ સર્વાનાજ્ઞાપયત્ પ્રભુઃ ।
તે તથેતિ તમુચ્ચાર્ય હર્ષિતાઃ સ્વસ્થલં યયુઃ ॥ ૫૬॥

તતશ્ચતુર્ભુજો દેવોઽન્તર્દધે ચ પ્રજાપતે ।
કશ્યપો દિતિસંયુક્તઃ શુશોચ તમનુસ્મરન્ ॥ ૫૭॥

પિતરૌ વાક્યમૂચે સા વાણી ચાઽકાશસમ્ભવા ।
સ્થાપ્ય મૂર્તિં ગણેશસ્ય ભજતં નિત્યમાદરાત્ ॥ ૫૮॥

તથા ચકાર દિત્યા સ કશ્યપો બ્રાહ્મણૈઃ સહ ।
સ્થાપયામાસ મૂર્તિં વૈ ચતુર્ભુજસ્ય સર્વદામ્ ॥ ૫૯॥

હૃદિ ચિન્તામણિં ધ્યાત્વા બહિઃ પૂજ્ય ચતુર્ભુજમ્ ।
સંસ્થિતૌ ભક્તિસંયુક્તૌ દિતિકશ્યપકૌ કિલ ॥ ૬૦॥

આસુરં ભાવમુત્સૃજ્ય દિતિર્ભક્તિસમન્વિતા ।
ગાણપત્યસ્વભાવેનાઽભજત્તં તુ ચતુર્ભુજમ્ ॥ ૬૧॥

એતચ્ચતુર્ભુજસ્યૈવ ચરિતં કથિતં મયા ।
વિઘ્નરાજકલારૂપોઽવતારોઽયમુદાહૃતઃ ॥ ૬૨॥

ય ઇદં શ‍ૃણુયાન્ મર્ત્યઃ શ્રાવયેદ્વા પઠેત્ સ તુ ।
ભુક્તિં મુક્તિં લભેદ્બ્રહ્મ ભક્તિં વિઘ્નેશ્વરે પરામ્ ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે ચતુર્ભુજાવતારવિક્રમવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૭.૧૫
(Page ખં. ૭ અ. ૧૬ પાન ૩૬)

## ૭.૧૬ ચરિતમાહાત્મ્યવર્ણનં નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતો બહૌ ગતે કાલે દૈત્યેન્દ્રા બલસંયુતાઃ ।
દેવાન્ જેતું પ્રસન્નદ્ધા બભૂવુઃ ક્રોધસંયુતાઃ ॥ ૧॥

પ્રહ્લાદં મુખ્યકં કૃત્વા બ્રહ્મશાપેન મોહિતમ્ ।
આયયુસ્તાં પ્રણેમુસ્તે દિતિં કશ્યપસંયુતામ્ ॥ ૨॥

તાનુવાચ સ્વયં દેવી દિતિઃ ક્રોધસમન્વિતા ।

મા ગચ્છત મહાદુષ્ટાઃ ધર્મં સન્ત્યજ દૈત્યપાઃ ॥ ૩॥

ચતુર્ભુજેન દેવેશાઃ સ્થાપિતાઃ સ્વર્ગભૂમિષુ ।
પાતાલવિવરેષ્વત્ર યૂયં રાજ્યસમન્વિતાઃ ॥ ૪॥

પ્રણમ્ય તામનાદૃત્ય દૈત્યેશા લોભસંયુતાઃ ।
યયુર્દેવજયાર્થં તે હ્યધર્મેણ પ્રણોદિતાઃ ॥ ૫॥

દિતિઃ કશ્યપસંયુક્તા દૈત્યાનાં સુદુરાત્મનામ્ ।
પક્ષં ત્યક્ત્વા ગણેશાનમભજદ્ ભક્તિસંયુતા ॥ ૬॥

એવં વૈ દેવપક્ષં સા ત્યક્ત્વા મુનિસમન્વિતા ।
અદિતિસ્તં સ્વપુત્રં ચાભજદ્વિનાયકં પરમ્ ॥ ૭॥

દૈવીં પ્રકૃતિમુત્સૃજ્ય મૃન્મૂર્તિસ્થં વિનાયકમ્ ।
યોગભાવેન ભક્ત્યા તમભજત્પ્રેમસંયુતા ॥ ૮॥

વિનતાદ્યાસ્તથા દક્ષ કશ્યપેનોપદેશિતાઃ ।
શાન્તિયુક્તા ગણેશાનમભજન્ પ્રેમસંયુતાઃ ॥ ૯॥

દક્ષ ઉવાચ ।
દૈવીં તુ પ્રકૃતિં ત્યક્ત્વા તથાઽઽસુરીં મહામુને ।
કથં ગણેશ્વરં ભક્ત્યા ભજન્તિ વદ માનવાઃ ॥ ૧૦॥

મુદ્ગલ ઉવાચ ।
સકામિકં કરોતિ ચેન્નરઃ કર્મ યથાવિધિ ।
આસુરં તત્ સમાખ્યાતં દેહસૌખ્યકરં યતઃ ॥ ૧૧॥

નિષ્કામિકં કરોતિ ચેન્નરઃ દૈવં પ્રકીર્તિતમ્ ।
વિધિયુક્તં કર્મ દક્ષ મુક્તિદં તન્મતં બુધૈઃ ॥ ૧૨॥

સ્વધર્મસ્થૈર્જનૈઃ કર્મ ક્રિયતે વિવિધં પરમ્ ।
દેહધર્મં સમાજ્ઞાય યોગરૂપં ચ તત્ સ્મૃતત્ ॥ ૧૩॥

તદેવ દેવપ્રીત્યર્થં કર્મ ભક્તિમયં મતમ્ ।
ભક્તિભાવાર્થમાનન્દાત્ સસ્ત્રીકો મુનિરાકરોત્ ॥ ૧૪॥

એતત્તે કથિતં સર્વં વિઘ્નરાજચરિત્રકમ્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં શાન્તિદં ભક્તિકારણમ્ ॥ ૧૫॥

એવં નાનાઽવતારાશ્ચ વિઘ્નરાજસ્ય માનદ ।

તેષાં ચરિત્રકં કેન વક્તું નૈવ પ્રશક્યતે ॥ ૧૬॥

અયં વિઘ્નેશ્વરો દેવઃ સમસ્વાનન્દગો ભવેત્ ।
સત્યાસત્યે વિનિર્માય પ્રભુઃ ક્રીડતિ માયયા ॥ ૧૭॥

પૂર્ણયોગમયશ્ચાયં વિઘ્નરાજઃ પ્રકીર્તિતઃ ।
તસ્યાર્થં શ ૃણુ ભાવેન બ્રહ્મબુદ્ધિપ્રકાશકમ્ ॥ ૧૮॥

સમ્પ્રજ્ઞાતમયં બ્રહ્માઽસમ્પ્રજ્ઞાતગતં તથા ।
ભ્રમયુક્તં મહાવિઘ્નસંયુક્તં નાત્ર સંશયઃ ॥ ૧૯॥

ભ્રમહીનં તદેવાપિ વિઘ્નહીનં પ્રકીર્તિતમ્ ।
બ્રહ્મણિ બ્રહ્મભૂતં ચેન્નોભયં તત્ર વિદ્યતે ॥ ૨૦॥

વિશ્વેષાં વિઘ્નરાજોઽયં વિઘ્નકર્તા પ્રજાપતે ।
વિઘ્નહર્તા સ્વયં સાક્ષાદ્બ્રહ્મણાં ચ નિરન્તરમ્ ॥ ૨૧॥

સ્વયં વિઘ્નયુતો નૈવ વિઘ્નહીનો ન વિદ્યતે ।
એવં જ્ઞાત્વા નરો બ્રહ્મભૂતો ભવતિ વિઘ્નપમ્ ॥ ૨૨॥

ઇદં વૈઘ્નેશ્વરં ચિત્રં ચરિતં સંશ ૃણોતિ યઃ ।
પઠેદ્વા તસ્ય વિઘ્નેશઃ પ્રસન્નો જાયતે સદા ॥ ૨૩॥

પ્રસન્ને વિઘ્નરાજેન્દ્રે કિં કિં વૈ દુર્લભં ભવેત્ ।
સર્વસિદ્ધિયુતઃ સોંઽતે નરો બ્રહ્મૈવ જાયતે ॥ ૨૪॥

નાનેન સદૃશં કિઞ્ચિત્ પાવનં કુત્ર વર્તતે ।
ભુક્તિમુક્તિપ્રદં દક્ષ ચરિત્રં સંશ્રુતં ત્વયા ॥ ૨૫॥

પઞ્ચાગ્નિસાધનાદીનિ તપાંસિ વિવિધાનિ યઃ ।
(Page ખં. ૭ અ. ૧૬ પાન ૩૭)
કુર્યાત્તેભ્યોઽધિકં પુણ્યમસ્ય શ્રવણતો લભેત્ ॥ ૨૬॥

તીર્થાનિ વિવિધાન્યેવ સાધયિત્વા ફલં લભેત્ ।
તેભ્યોઽધિકં લભેત્ પુણ્યં ખણ્ડસ્યાસ્ય શ્રવાન્નરઃ ॥ ૨૭॥

યજ્ઞાનાં સાઙ્ગજાતાનાં ફલં તસ્માત્ પ્રજાપતે ।
અધિકં શ્રવણાદસ્ય લભેત્ ખણ્ડસ્ય માનવઃ ॥ ૨૮॥

ઇષ્ટાપૂર્તાદિકં સર્વં યઃ કરોતિ નરોત્તમઃ ।
તેભ્યોઽધિકં લભેત્તસ્ય શ્રવણાન્નાત્ર સંશયઃ ॥ ૨૯॥

પુત્રપૌત્રાદિસંયુક્તો ધનધાન્યાદિસંયુતઃ ।
આરોગ્યેણ નરો યુક્તો ભવેદસ્ય તુ સંશ્રવાત્ ॥ ૩૦॥

વન્ધ્યાદિદોષભાવેન પીડિતો યદિ માનવઃ ।
અસ્ય શ્રવણમાત્રેણ પીડાહીનો ભવેત્ સદા ॥ ૩૧॥

યસ્ય ગેહે સ્થિતશ્ચાયં ખણ્ડો વિઘ્નેશભક્તિદઃ ।
કદા તસ્ય પિશાચેભ્યશ્ચૌરાદિભ્યો ભયં ન હિ ॥ ૩૨॥

નાગ્નિભૂતં ન ભૂતેભ્યો ભયં રાજભવં કદા ।
ગ્રહેભ્યો રાશિસંસ્થેભ્યઃ પૂતનાદિભયં ન ચ ॥ ૩૩॥

ધર્માર્થકામમોક્ષાણાં દાયકોઽયં પ્રકીર્તિતઃ ।
બ્રહ્મભૂયપ્રદઃ સાક્ષાચ્છ્રવણેન ન સંશયઃ ॥ ૩૪॥

બહુનાઽત્ર કિમુક્તેન યત્ર વિઘ્નપતિઃ સ્વયમ્ ।
સંસ્થિતસ્તેન સામાન્યં ભવિષ્યતિ કિમપ્યહો ॥ ૩૫॥

ઇતિ તે કથિતં સર્વં વિઘ્નરાજસ્ય ચેષ્ટિતમ્ ।
ભજ ત્વં સર્વભાવેન ગણેશં સુખમાપ્સ્યસિ ॥ ૩૬॥

ન શ્રાવ્યં દુર્જનાયેદં ચરિત્રં સર્વસિદ્ધિદમ્ ।
સાધવે ગાણપત્યાય શ્રાવ્યં યત્નેન માનદ ॥ ૩૭॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાયોગી મુદ્ગલો વિરરામ હ ।
દક્ષો હૃષ્ટમનાસ્તં તુ પ્રણનામ કૃતાઞ્જલિઃ ॥ ૩૮॥

મયા તે કથિતં પૂર્ણં ચરિત્રં વિઘ્નપસ્ય યત્ ।
યથા મુદ્ગલવક્ત્રાચ્ચ નિઃસૃતં તાદૃશં પરમ્ ॥ ૩૯॥

ભવતાં સઙ્ગયોગેન પાવિતોઽહં ન સંશયઃ ।
શ્રોતુમિચ્છસિ કિં ભૂયો વદ શૌનક તે હિતમ્ ॥ ૪૦॥

વિઘ્નરાજસમં નૈવ યથા વિપ્ર તથા પરમ્ ।
ચરિત્રં વિઘ્નરાજસ્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
સપ્તમે ખણ્ડે વિઘ્નરાજચરિતે ચરિતમાહાત્મ્યવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૭.૧૬

॥ શ્રીગજાનનાર્પણમસ્તુ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણે સપ્તમઃ ખણ્ડઃ સમાપ્તઃ ॥

Proofread by Yash Khasbage

*MudgalapurAna Khanda 7 Vighnarajacharitam*
pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*